M. T. B. COLLEGE, SURAT
Manuscripts Library
Sata
No. Ref. / Ser. 673
Title: Siddhanta Muktavali

673

673

सिद्धान्त मुक्तावलि:

	: Siddhānta Muktāvali		: Title
	:	: Siddhānta Pañcānan	: Author
	:	:	: Editor
	:	:	: Year, Vols.
	:	:	: Publisher
673	:	: Endo abrupte	: Remarks

अथ द्रांलकाय प्रारभ्यते॰ रस्क॰॥

प्रारब्धमिष्टस्यग्रंथस्येत्यर्थः ४

मुक्तावली
१

श्रीगणेशायनमः चूडामणीकृतविधुर्वलयीकृतवासुकिः ॥ भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥१॥
निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरंतनोक्तिभिः ॥ विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः
॥२॥ सुदृढ्या गुणगुंफितासु कृतिनां सत्कर्मणां ज्ञापिका सत्सामान्यविशेषनित्यमिलितत्वाभावप्रकर्षोज्ज्वला ॥
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धांतमुक्तावली विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरं ॥३॥ विघ्नवि
घातायकृतं मंगलं शिष्यशिक्षायै निबध्नाति ॥ नूतनेत्यादि ॥ नूतनजलधररुचये गोपवधूटीदुकूलचोराय ॥ तस्मै
कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥१॥ ननु मंगलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति न कारणं ॥ मंगलं वि
नापि नास्तिकादीनां ग्रंथे निर्विघ्नपरिसमाप्तिं प्रति दर्शनादिति चेन्न ॥ अविगीतशिष्टाचारविषयत्वेन मंगलस्य
सफलत्वे सिद्धे तत्र जिज्ञासायां संभवति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यत्वात् उपस्थि
तत्वाच्च समाप्तिरेव फलं कल्प्यते ॥ इत्थं च यत्र मंगलं न दृश्यते तत्र जन्मांतरीयं तत्कल्प्यते ॥ यत्र च सत्यपि मं
गले समाप्तिर्न दृश्यते तत्र बलवत्तरो विघ्नो विघ्नप्राचुर्यं वा बोध्यं ॥ प्रचुरस्य अस्यैव बलवत्तरविघ्ननिवारणे कारण

विजातीयविघ्नः ०

प्रचुरस्यैवमंगलस्येत्यर्थः ०

कारणत्वबोधेः ०

मंगलस्यकारणत्वाभावेव्यतिरेकव्यभिचारः

अनुमीयते कोऽर्थः समाप्त्यतिशेषः ३

विघ्नध्वंसपूर्वकसमाप्तिरित्यर्थः ४
फल

मंगलस्यसमाप्तिफलकत्वेवेत्यर्थः २

ल

श्रीः

मंगलं

तथापि कादंबर्यां न विघ्नध्वंसोऽभावात् समाप्तिः पर्वं आयतं मंगलं कृपहेतुः स वादित्याशंक्याह ०

एवकारेणसमाप्तिव्यवच्छेदः ०

ननु विघ्नसंशयमंगलाचरणमेव स्वजन्यविघ्नध्वंसंसंबंधेनमंगलाभावात्समाप्तिरितिभावः ०

निर्विघ्नत्वरूपानुष्ठितमंगलस्य ३

सिद्धमित्यर्थः ६ ३

विषयतासंबंधेनमंगलप्रतिशेषः ३

स्थानं

त्वं बोध्यं ॥ विघ्नध्वंसस्तु मंगलद्वारमित्याहुः ॥ नव्यास्तु ॥ मंगलस्य विघ्नध्वंस एव फलं ॥ समाप्तिस्तु बुद्धि
प्रतिभादिकारणकलापोऽत् ॥ नचैवं स्वतः सिद्धविघ्नविरहवता कृतस्य मंगलस्य निष्फलत्वापत्तिरिति वाच्यं ॥
इष्टापत्तेः ॥ विघ्नशंकया तदाचरणात् ॥ तथैव शिष्टाचारात् ॥ न च तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यापत्ति
रिति वाच्यं ॥ सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात् ॥ अत एव पापभ्रमेण कृतप्रायश्चित्तस्य निष्फलत्वेऽपि न त
द्बोधकवेदाप्रामाण्यं ॥ मंगलं च विघ्नध्वंसविशेषे कारणं ॥ विघ्नध्वंसविशेषे विनायकस्तवपाठादिः ॥ क्वचिच्च
विघ्नात्यंताभाव एव समाप्तिसमाप्तिसाधनं ॥ प्रतिबंधकसंसर्गाभावस्यैव कार्यजनकत्वात् ॥ इत्थं च नास्तिकादि
ग्रंथेषु जन्मांतरीयमंगलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यंताभावो वास्तीति न व्यभिचार इत्याहुः ॥ संसारेति
संसार एव महीरुहो वृक्षस्तस्य बीजाय निमित्तकारणायेत्यर्थः ॥ एतेन ईश्वरे सद्भावे प्रमाणं दर्शितं भवति ॥ तथाहि
घटादिकार्यं कर्तृजन्यं कार्यत्वात् तथा क्षित्यंकुरादिकमपि ॥ न च तत्कर्तृकत्वमस्मदादीनां संभवतीत्यतस्त

तद्विशेषस्तु स्त्रीत्वस्य आदिनाविघ्नसंमर्गो भावः २

विघ्नसंसर्गाभावप्रतियोगिनः कारणत्वादेव ४

मंगलस्यविघ्नध्वंसजनकत्वेचेद २
मंगलाचरणात् २

स्वाभ्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेनस्वजन्यविघ्नध्वंसप्रतिस्वस्यकारणत्वं ५

सि॰मु॰व॰ त्वकर्तृकत्वेनेश्वरासिद्धिः चेन्न शरीराजन्यत्वेन कर्त्रजन्यत्वसाधकेन सत्प्रतिपक्षत्वादिति व्याच्यं ॥ अप्रयोज
॥२॥ कत्वात् ॥ ममतु कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एव अनुकूलस्तर्कः ॥ द्यावाभूमी जनयन्देव एकः ॥ विश्व
स्य गोप्ता भुवनस्य कर्तेत्यादय आगमा अपि अनुसंधेयाः ॥ द्रव्यं गुणास्तथा कर्म सामान्यं
सविशेषकं ॥ समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः ॥ २ ॥ सप्तमस्याभावत्वकथनादेव षण्णां भावत्वं
प्राप्तं ॥ तेन भावत्वेन पृथगुपन्यासो न कृतः ॥ एते च पदार्था वैशेषिकप्रसिद्धाः ॥ नैय्यायिकानामप्यविरुद्धाः
प्रतिपादितं चैवमेव भाष्ये ॥ अत एव उपमानचिंतामणौ सप्तपदार्थभिन्नतया सादृश्यस्यातिरिक्तपदार्थ
त्वमाशंकितं ॥ ननु कथमेत एव पदार्थाः शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वात् ॥ तथाहि ॥ मण्यादिस
हितेन वह्निना दाहो न जन्यते ॥ तच्छून्येन तु जन्यते ॥ तत्र मण्यादिना वह्नौ दाहानुकूला शक्तिर्नाश्यते ॥ उ ॥ ३ ॥
त्तेजकेन मण्याद्यपसारेण च जन्य ×न× ते इति कल्प्यते ॥ एवं सादृश्यमपि अतिरिक्तः पदार्थः ॥ तद्भिन्नत्वे सु
पूर्वोत्पन्नशक्त्या पुनः सिद्धौ

पदार्थे ध्वंतर्भवति ॥ सामान्येपि सत्वात् ॥ यथा गोत्वं नित्यं तथा अश्वत्वमपीति सादृश्यप्रतीतेः ॥ नाप्यभावे ॥ सत्वेन
प्रतीयमानत्वात् ॥ इति चेन्न ॥ मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति मण्यभावादेर्वास्वातंत्र्येण हेतुत्वं कल्प्यते ॥ अने २
नैव सामंजस्ये अनंतशक्तितत्प्रागभावध्वंसकल्पनानौचित्यात् ॥ न चोत्तेजके सति प्रतिबंधकसद्भावे कथं दाह इति वाच्यं ॥
उत्तेजकाभावविशिष्टमण्यभावस्य हेतुत्वात् ॥ एवं सादृश्यमपि न पदार्थांतरं ॥ किं तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वं ॥
यथा चंद्रभिन्नत्वे सति चंद्रगताह्लादकत्वादिमत्वं मुखे चंद्रसादृश्यमिति प्रतीतेः ॥ द्रव्याणि विभजते ॥ क्षितिरि
ति ॥ क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः ॥ द्रव्याण्यथ गुणा रूपं रसो गंधस्ततः परं ॥ ३ ॥ स्पर्शः
संख्या परिमितिः पृथक्त्वं च ततः परं ॥ संयोगश्च विभागश्च परत्वं चापरत्वकं ॥ ४ ॥ बुद्धिः सुखं दुः
खमिच्छा द्वेषो यत्नो गुरुत्वकं ॥ द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ॥ ५ ॥ क्षितिः पृथिवी ॥ आपो
जलानि ॥ मरुद्वायुः ॥ व्योम आकाशः ॥ देही आत्मा ॥ कालदिक्मनांसि ॥ एतानि नव द्रव्याणीत्यर्थः ॥

मु. व. ननु द्रव्यत्वजातौ किं मानं ॥ न हि प्रत्यक्षं तत्र प्रमाणं ॥ घृतजतुप्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न ॥ कार्यसमवायिका
२ रणतावच्छेदकतया संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतया तत्सिद्धेः ॥ ननु दशमं द्रव्यं कुतो नोक्तं ॥ त
द्धि प्रत्यक्षेण गृह्यते ॥ तस्य च रूपवत्वात्कर्मवत्वाच्च द्रव्यत्वं ॥ तच्च गंधशून्यत्वान्न पृथिवी ॥ नीलरूपत्वाच्च न जलादिकं
॥ तत्प्रत्यक्षे चालोकनिरपेक्षं चक्षुः कारणमिति चेन्न ॥ आवश्यकतेजोभावेनोपपत्तौ द्रव्यांतरकल्पनाया अन्याय्यत्वा
त् ॥ रूपवत्ताप्रतीतिस्तु भ्रमरूपा ॥ कर्मवत्ताप्रतीतिरपि आलोकापसारणोपाधिकी भ्रांतैव ॥ तमसोऽतिरिक्तत्वेऽनंता
वयवादिकल्पनागौरवात् ॥ सुवर्णस्य यथा तैजसत्वं तथाग्रे वक्ष्यते ॥ गुणान्विभजते ॥ अथ गुणा इति ॥ एते गुणा
श्चतुर्विंशतिसंख्याकाः कणादेन कंठतश्चशब्देन च दर्शिताः ॥ तत्र गुणत्वादिजातिसिद्धिरग्रे वक्ष्यते ॥ कर्माणि विभजते ॥
उत्क्षेपणमिति ॥ उत्क्षेपणं ततोपक्षेपणमाकुंचनं तथा ॥ प्रसारणं च गमनं कर्माण्येतानि पंच च ॥ ६ ॥ कर्मत्वादिजातिस्तु २
प्रत्यक्षसिद्धा ॥ एवमुत्क्षेपणत्वादिकमपि ॥ ननु भ्रमणादिकमपि पंचकर्माधिकं तथा कुतो नोक्तमत आह ॥ भ्रमणमि

ति ॥ भ्रमणं रेचनं स्यंदनोर्ध्वज्वलनमेव च ॥ तिर्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥ सामान्यं निरूपयति ॥ सामान्यमि
ति ॥ सामान्यं द्विविधं प्रोक्तं परं चापरमेव च ॥ द्रव्यादित्रिकवृत्तिस्तु सत्तापरतयोच्यते ॥ ८ ॥ तल्लक्षणं तु नित्यत्वे सत्यनेक
समवेतत्वं सामान्यत्वं ॥ अनेकसमवेतत्वं संयोगादीनामप्यस्त्यतो नित्यत्वे सतीति ॥ नित्यत्वे सति समवेतत्वं गगनपरिमा
णादीनामप्यस्ति ॥ अत उक्तमनेकेति ॥ नित्यत्वे सति अनेकवृत्तित्वं अत्यंताभावेप्यस्ति ॥ अतो वृत्तिसामान्यं विहाय समवे
तत्वमुक्तं ॥ एकव्यक्तिमात्रवृत्तिस्तु न जातिः ॥ तथा चोक्तं ॥ व्यक्तेरभेदस्तुल्यत्वं संकरोथानवस्थितिः ॥ रूपहानिरसंबंधो
जातिबाधकसंग्रहः ॥ १ ॥ द्रव्यादित्रिक इति ॥ द्रव्यादित्रिकवृत्तिस्तु सत्तापरतयोच्यते ॥ ८ ॥ परभिन्ना तु या जातिः सैवापर
तयोच्यते ॥ द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥ ९ ॥ द्रव्यत्वादिकजातिरिति ॥ परत्वं अधिकदेशवृत्तित्वं ॥ अ
परत्वं अल्पदेशवृत्तित्वं ॥ सकलजात्यपेक्षया सत्तायाः परत्वं ॥ एतद्बोधनाय द्रव्यादित्रिकवृत्तिरित्युक्तं ॥ तदपेक्ष
या च अन्यासां जातीनामपरत्वं ॥ व्यापकत्वादिति ॥ व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च ॥ पृथिवीत्वा

मु.सि. घपेक्षयाव्यापकत्वादधिकदेशवृत्तित्वात्परत्वं ॥ सत्तापेक्षया व्याप्यत्वादल्पदेशवृत्तित्वाद्द्रव्यत्वस्यापरत्वं ॥ वि
४ शेषान्निरूपयति ॥ अंत्येति ॥ अंत्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः १० ॥ अंते अवसाने वर्त्तते अंत्याः ॥ यदपेक्षया विशेषो
नास्तीत्यर्थः ॥ घटादीनां द्व्यणुकपर्यंतानां तत्तदवयवभेदात्परस्परं भेदः ॥ परमाणूनां परस्परं भेदको विशेष एव ॥ स तु
स्वत एव व्यावृत्तः ॥ तेन तत्र विशेषांतरं नास्तीति भावः ॥ समवायं दर्शयति ॥ घटादीनामिति ॥ घटादीनां कपालादौ द्रव्ये
षु गुणकर्मणोः ॥ तेषु जातेश्च संबंधः समवायः प्रकीर्तितः ॥ ११ ॥ अवयवावयविनोर्गुणगुणिनोः क्रियावतोः जातिव्य क्रिया
क्त्योर्विशेषनित्यद्रव्ययोश्च संबंधः समवायः ॥ समवायत्वं नित्यसंबंधत्वं ॥ तत्र प्रमाणं तु गुणक्रियादिविशिष्टबुद्धि
र्विशेषणविशेष्यतत्संबंधविषया ॥ विशिष्टबुद्धित्वात् ॥ दंडी पुरुष इति विशिष्टबुद्धिवत् ॥ इत्यनुमानेन संयोगादे
र्बाधात्समवायसिद्धिः ॥ न च स्वरूपसंबंधेन सिद्धसाधनमर्थांतरं वा ॥ अनंतस्वरूपाणां संबंधत्वकल्पने गौरवा ४
त् ॥ लाघवादेकसमवायसिद्धिः ॥ न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसंगः ॥ तत्र रूपसमवायित्वेपि रूपा

षट्प्रतियोगिकान्योन्याभावः ५

भावात् ॥ न चैवमभावस्यापि वैशिष्ट्यं संबंधांतरं सिद्ध्येदिति वाच्यं ॥ तस्य नित्यत्वे भूतले घटानयनानंतरमपि घ
टाभावबुद्धिप्रसंगात् ॥ घटाभावस्य तत्र सत्वात् ॥ तस्य नित्यत्वात् ॥ अन्यथा देशांतरेपि घटाभावप्रतीतिर्न स्यात् ॥ वै
शिष्ट्यस्य च तत्र सत्वात् ॥ मम तु घटे पाकरक्तदशायां श्यामरूपस्य नष्टत्वान्न तद्बुद्धिः ॥ वैशिष्ट्यस्यानित्यत्वे अनं
तवैशिष्ट्यकल्पने तवैव गौरवं ॥ इत्थं च तत्तत्कालीनं तत्तद्भूतलादिकं तत्तदभावानां संबंधः ॥ अभावं विभजते ॥ अभाव
स्त्विति ॥ अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ॥ अभावत्वं द्रव्यादिषट्कान्योन्याभाववत्वं ॥ संसर्गेति ॥ संस
र्गाभावान्योन्याभावभेदादित्यर्थः ॥ अन्योन्याभावस्यैकविधत्वात्तद्विभागाभावात्संसर्गाभावं विभजते ॥ प्रागभाव
इति ॥ प्रागभावस्तथा ध्वंसोप्यत्यंताभाव एव च ॥ १२ ॥ एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते ॥ संसर्गाभावत्वं अन्यो
भाव न्याभावभिन्नाभावत्वं ॥ अन्योन्याभावत्वं तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं ॥ विनाश्यभावत्वं प्रागभावत्वं ॥
जन्याभावत्वं ध्वंसत्वं ॥ नित्यसंसर्गाभावत्वं अत्यंताभावत्वं ॥ अत्र भूतला ×का× दौ घटादिकमपसारितं पुनरानी

२रक्तोनास्ति२श्यामोनास्ति ३ तयोर्विरोधात्

सि·मु· तं च तत्र घटकालस्यसंबंधाघटकत्वादत्यंताभाव स्यानित्यत्वेपिघटकालेनघटात्यंताभावबुद्धिः॥
॥ ५॥ तत्रोत्पादविनाशशाली॥ चतुर्थोयमभावइतिकेचित्॥ अत्रध्वंसप्रागभावाधिकरणेनात्यंताभावइतिप्राचां मतं॥
श्यामघटेरक्तघटोनास्तिइतिधीःप्रागभावंध्वंसंचावगाहते॥ नतुतदत्यंताभावं॥ नव्यास्तुतत्रविरोधेमानाभावात्॥ ध्वं
सादिकालावच्छेदेनैवात्यंताभावोवर्ततइत्याहुः॥ नन्वस्तुअभावानामधिकरणात्मकत्वं॥ लाघवादितिचेन्न॥ अनंताधि
त्वं करणात्मकत्वकल्पनापेक्षयाअतिरिक्तकल्पनायाएवलघीयस्त्वात्॥ एवंचाधाराधेयभावोप्युपपद्यते एवंतत्तच्छब्दैरं द
मु धकारादिभावानांप्रत्यक्षत्वमुपपद्यते॥ अन्यथातत्तदधिकरणानांत्वगादिंद्रियायोग्यत्वात्प्रत्यक्षत्वंनस्यात्॥ एत
ज्ज्ञानविशेषकालविशेषात्मकत्वमभावस्येतिप्रत्युक्तं॥ अप्रत्यक्षत्वापत्तेः॥ इदानींपदार्थानांसाधर्म्यवैधर्म्येवक्तुमुपक्र
मते॥ सप्तानामिति॥ सप्तानामपिसाधर्म्यंज्ञेयत्वादिकमुच्यते॥१२॥ समानोधर्मोयेषांतेसधर्माणस्तेषांभावःसा ५ श्रीः
धर्म्यं॥ समानोधर्मइतिफलितोर्थः॥ विरुद्धोधर्मोयेषांतेविधर्माणस्तेषांभावोवैधर्म्यं॥ विरुद्धोधर्मइतिफलितोर्थः
त्य

ज्ञेयत्वंज्ञानविषयता॥ साचसर्वत्रैवास्ति॥ ईश्वरज्ञानविषयतायाःकेवलान्वयित्वात्॥ एवंअभिधेयत्वंप्रमेयत्वादिकं
बोध्यं॥ द्रव्येति॥ द्रव्यादयःपंचभावाअनेकेसमवायिनः॥१३॥ द्रव्यगुणकर्मसामान्यविशेषाणांसाधर्म्यंअनेकत्वंसमवा
यित्वंच॥ यद्यप्यनेकत्वमभावेप्यस्ति॥ तथाप्यनेकत्वेसतिभाववत्त्वंपंचानांसाधर्म्यं॥ तथाचअनेकभाववृत्तिपदार्थवि
भाजकोपाधिमत्त्वमितिफलितोर्थः॥ तेनैकप्रत्येकंघटादौनाव्याप्तिः॥ समवायित्वंसमवायसंबंधेनसंबंधित्वं॥ नतुस
मवायवत्त्वंसामान्यादावभावात्॥ सत्तावंतइति॥ सत्तावंतस्त्रयस्त्वाद्याः॥ द्रव्यगुणकर्माणिसत्तावंतीत्यर्थः॥ गु
णादिरिति॥ गुणादिर्निर्गुणक्रियः॥ यद्यपिगुणक्रियाशून्यत्वमाद्यक्षणेघटादावतिव्याप्तं॥ क्रियाशून्यत्वंगगनादौवा
तिव्याप्तं॥ तथापिगुणवदवृत्तिधर्मवत्त्वंकर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वंचतदर्थः॥ नहिद्रव्यत्वंगुणवदवृत्तिक
र्मवदवृत्तिवा किंतुगुणत्वादिकंतथा॥ आकाशत्वादिकंतुनपदार्थविभाजकोपाधिः॥ सामान्येति॥ सामान्यपरिही
नास्तुसर्वेजात्यादयोमताः॥ सामान्यानधिकरणत्वंसामान्याभावादीनामित्यर्थः॥ पारिमांडल्येति॥ पारिमांडल्यभि

सि॰मु॰ ्नानांकारणत्वमुदाहृतं ॥१५॥ पारिमांडल्यमन्यपरिमाणंकारणत्वंतद्भिन्नानामित्यर्थः ॥ अणुपरिमाणंतुनकस्या
पिकारणं ॥ तद्धिसदाश्रयारब्धद्रव्यपरिमाणारंभकंभवेत् ॥ तच्चनसंभवति ॥ परिमाणस्यस्वसमानजातीयोत्कृष्ट
५ परिमाणजनकत्वात् ॥ महदारब्धस्यमहत्तरत्ववत् अणुजन्यस्याप्यणुतरत्वप्रसंगात् ॥ एवंपरममहत्परिमाणंअ
तींद्रियंसामान्यंविशेषाश्चबोध्याः ॥ इदमपियोगिप्रत्यक्षविषयस्यनकारणत्वं ॥ ज्ञायमानंसामान्यंनप्रत्यासत्तिः।
ज्ञायमानंलिंगंनानुमितिकरणमित्यभिप्रायेण। मानसप्रत्यक्षेआत्ममहत्त्वस्यकारणत्वात्परममहत्परिमाणमाका त
शादेर्बोध्यं ॥ तस्यापिनकारणत्वमित्याचार्याणामाशयइत्यन्येतन्न ॥ ज्ञानातिरिक्तंप्रत्यकारणतायाएवआचा
र्यैरुक्तत्वात् ॥ ननुकारणत्वंकिमतआह ॥ अन्यथेति ॥ तस्यकारणत्वस्य ॥ तत्रेति अन्यथासिद्धिशून्यस्यनिय छ्रौ
तापूर्ववर्तिता ॥ कारणत्वंभवेत्तस्यत्रैविध्यंपरिकीर्तितं ॥१६॥ समवायिकारणत्वंज्ञेयमथाप्यसम
वायिहेतुत्वं ॥ एवंन्यायनयज्ञैस्तृतीयमुक्तंनिमित्तहेतुत्वं ॥१७॥ यत्समवेतंकार्यंभवतिज्ञेयंतुसमवायिज
तै तु

२ एवं। वेगादीनांअभिघाताद्यसमवायिकारणत्वंस्यात् ॥ एवंज्ञानादिकंमिच्छाद्यसमवायिकारणंस्यात् ॥ २

नकंतत् ॥ तस्यकारणत्वस्य ॥ तत्रेति ॥ तत्रासन्नंजनकंद्वितीयमाभ्यांपरंतृतीयंस्यात् ॥१८॥ येनसहपूर्वभावः ॥ त
त्रसमवायिकारणेप्रत्यासन्नंद्वितीयं ॥ असमवायिकारणमित्यर्थः ॥ अत्रयद्यपितुरीतंतुसंयोगेपटासमवायिका
रणत्वंस्यात् ॥ तथापिपटासमवायिकारणलक्षणेतुरीतंतुसंयोगभिन्नत्वंदेयं ॥ तुरीतंतुसंयोगस्तुरीपटसंयोगंप्रत्य
समवायिकारणंभवत्येव ॥ एवंवेगादिकंवेगस्पंदाद्यसमवायिकारणंभवत्येवेति ॥ तन्नत्कार्यासमवायिकारणलक्ष
णेतत्तद्भिन्नत्वंदेयं ॥ आत्मविशेषगुणानांकुत्राप्यसमवायिकारणत्वंनास्ति ॥ तेनतद्भिन्नत्वंसामान्यलक्षणेदेय
मेव ॥ अत्रासमवायिकारणप्रत्यासन्नंद्विविधं ॥ कार्यैकार्थप्रत्यासत्त्याकारणैकार्थप्रत्यासत्त्याच ॥ आद्यंयथा ॥
घटादिकंप्रतिकपालसंयोगादिकमसमवायिकारणं ॥ तत्रकार्येणघटेनसहकारणस्यकपालसंयोगस्यएक
स्मिन्कपालेप्रत्यासत्तिरस्ति ॥ द्वितीयंयथा ॥ घटरूपंप्रतिकपालरूपंअसमवायिकारणं ॥ तत्रघटरूपंप्रतिका
रणंघटः ॥ तेनसहकपालरूपस्यएकस्मिन्कपालेप्रत्यासत्तिरस्ति ॥ तथाचस्वकेचित्स्वसमवायसंबंधेनकेचित्स्व

समवायिसमवायसंबंधेनेतिफलितोर्थः ॥ उक्तं चकार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्याकारणं ॥ ज्ञानादिभि
न्नंसमवायिकारणमितिसमान्यतोलक्षणंपर्यवसन्नं ॥ आभ्यांसमवायिकारणासमवायिकारणाभ्यांपरंभिन्नं
कारणं ॥ तृतीयंनिमित्तकारणमित्यर्थः ॥ इदानीमन्यथासिद्धमेवकियत्तांतदाह ॥ येनेत्यादिना ॥ येनसहपूर्वभावः
यत्कार्यंप्रतिकारणस्यपूर्ववृत्तितायेनरूपेणगृह्यतेतत्कार्यंप्रतितद्रूपमन्यथासिद्धं ॥ यथाघटंप्रतिदंडत्वमिति ॥
द्वितीयमन्यथासिद्धमाह ॥ कारणमिति ॥ कारणमादायवायस्य ॥ यस्यस्वातंत्र्येणान्वयव्यतिरेकौनस्तः किंतु
कारणमादायअन्वयव्यतिरेकौगृह्येतेतदन्यथासिद्धं ॥ तद्यथादंडरूपं ॥ तृतीयमाह ॥ अन्यंप्रतीति ॥ अन्यंप्रति
पूर्वभावेज्ञातेयतेत्पूर्वभावविज्ञानं ॥ १९ ॥ अन्यंप्रतिपूर्ववृत्तित्वंगृहीत्वैवयस्ययत्कार्यंप्रतिपूर्ववृत्तित्वंगृह्यतेत
स्यतत्कार्यंप्रतिअन्यथासिद्धत्वं ॥ यथाघटादिकंप्रतिआकाशं ॥ आकाशस्यहिघटादिकंप्रतिआकाशत्वे
नकारणत्वंस्यात् ॥ आकाशत्वंतुशब्दसमवायिकारणत्वं ॥ अतःशब्दंप्रतिजनकत्वंगृहीत्वैवघटादिकंप्रति

जनकत्वंग्राह्यं ॥ अतस्तदन्यथासिद्धं ॥ शब्दाश्रयत्वेनकारणत्वेकान्यथासिद्धिरितिचेत्पंचमीति ॥ यथाआ
काशस्यशब्दंप्रतिजनकत्वेकिमवच्छेदकमितिचेत् कवत्वादिकं विशेषपदार्थोवेति ॥ चतुर्थमन्यथासिद्ध
माह ॥ जनकंप्रतीति ॥ जनकंप्रतिपूर्ववर्त्तितामपरिज्ञायनयस्यगृह्यते ॥ यत्कार्यजनकंप्रतिपूर्ववृत्तित्वंगृहीत्वै
वयस्ययत्कार्यंप्रतिपूर्ववृत्तित्वंगृह्यतेतस्यतत्कार्यंप्रति अन्यथासिद्धत्वं ॥ यथाकुलालपितुर्घटंप्रति ॥ तस्यकुला
लपितृत्वेनघटंप्रतिजनकत्वेऽन्यथासिद्धिः ॥ कुलालत्वेनकारणत्वेत्वविष्टापत्तिः ॥ कुलालमात्रस्यघटजनक
त्वापत्तेः ॥ पंचममन्यथासिद्धमाह ॥ अतिरिक्तमिति ॥ अतिरिक्तमथापियद्भवेन्नियतावश्यकपूर्वभाविनः ॥ २० ॥
एतेपंचान्यथासिद्धादंडत्वादिकमादिमं ॥ घटादौदंडरूपादिद्वितीयमपिदर्शितं ॥ २१ ॥ तृतीयंतुभवेद्व्योमकुला
लजनकोपरः ॥ पंचमो ॥ अवश्यक्लृप्तनियतपूर्ववर्त्तिनएवकार्यसंभवेतद्भिन्नमन्यथासिद्धमित्यर्थः ॥ अतएवप्र
त्यक्षेमहत्त्वंकारणंअनेकद्रव्यत्वमन्यथासिद्धं ॥ तत्रहिमहत्त्वमवश्यक्लृप्तंतेनानेकद्रव्यत्वमन्यथासिद्धं ॥ नचवै

सि॰मु॰ परीत्ये किं विनिगमकमिति वाच्यं ॥ महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् ॥ सैरिभादिरिति ॥ सैरिभादिस्याव
८॥ यद्व्यक्तिं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति तत्रापि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्व्य
क्तेरपि संभवे रासभो अन्यथासिद्ध इति भावः ॥ एतेष्विति ॥ एतेष्वावश्यकस्त्वसौ ॥ २२ ॥ समवायिकारणत्वं द्रव्य
स्यैवेति विज्ञेयं ॥ एतेषु पंचस्वन्यथासिद्धेषु मध्ये पंचमो ऽन्यथासिद्ध आवश्यकस्तेनैव परेषां चरितार्थत्वात् ॥
तथाहि ॥ दंडादिभिरेव अवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसंभवे दंडत्वादिकमन्यथासिद्धं ॥ न च वैपरीत्ये किं
विनिगमकमिति वाच्यं ॥ दंडत्वस्य कारणत्वे दंडघटितपरंपरायाः संबंधत्वे गौरवात् ॥ एवमन्येषामपि अनेन चरिता
र्थत्वं संभवति ॥ गुणकर्मेति ॥ गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वं ॥ २३ ॥ असमवायिकारणत्वं गु
णकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यं इत्यत्रापि तात्पर्यं ॥ तेन ज्ञानादीनामसमवायिकारणत्ववि ८॥
रहेऽपि नाव्याप्तिः ॥ अथवा असमवायिकारणवृत्तिसत्ताभिन्नजातिमत्त्वं तदर्थः ॥ अन्यत्रेति ॥ नित्यद्रव्यमन्य
अन्यत्र

त्राश्रितत्वमिहोच्यते ॥ नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः आश्रितत्वं
तु समवायादिसंबंधेन वृत्तिमत्त्वं ॥ कालिकविशेषणतया नित्यानामपि कालादौ वृत्तेः ॥ कालिकविशेषणतान्य
न संबंधेन वृत्तिमत्त्वमिति परमार्थः ॥ तेन समवायस्य समवायेनावृत्तावपि न क्षतिः ॥ इदानीं द्रव्यस्यैव विशिष्य सा
वैधर्म्ये धर्म्यं वक्तुमुपक्रम्यते ॥ क्षित्यादीनामिति ॥ क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ॥ २४ ॥ क्षितिर्जलं तथा ते
जः पवनो मन एव च ॥ परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥ २५ ॥ पृथिव्यप्तेजोवायुमनसां परापरत्वं मूर्त
त्वं कर्मवत्त्वं वेगवत्त्वं च साधर्म्यं ॥ न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यं ॥ परत्वादिस
मानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥ मूर्तत्वमपकृष्टपरिमाणवत्त्वं ॥ तच्चैतेषामेव ॥ ग
प गनादिपरिमाणस्य कुतोप्यपकृष्टत्वाभावात् ॥ पूर्ववत्कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं
वेगवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं बोध्यं ॥ कालेति ॥ कालखात्मदिशां सर्वगतत्वं परमं महत् ॥ कालखात्मदि

ज्ञानलक्षणप्रत्यासत्तिजन्यं ज्ञानं उपनीतभानं ४

द्रव्य

सि॰मु॰ शांसर्वगतत्वं सर्वमूर्तद्रव्यसंयोगित्वं परममहत्त्वं च परममहत्त्वं जातिविशेषोत्कर्षाश्रयपरिमाणत्वं वा ॥ क्षि

६ त्यादीनि ॥ क्षित्यादि पंच भूतानि चत्वारि स्पर्शवंति हि २६॥ द्रव्यारंभश्चतुर्षु स्यादथाकाशशरीरिणां ॥ अव्याप्यवृ

त्तिः क्षणिको विशेषगुण इष्यते २७॥ क्षित्यप्तेजोवाय्वाकाशानां भूतत्वं ॥ तच्च बहिरिंद्रियग्राह्यविशेषगुणवत्त्वं

अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यं ॥ तेन ज्ञातो घट इति प्रत्यक्षे ज्ञानस्याप्युपनीतभानविषयत्वा

त्तद्वति आत्मनि नातिव्याप्तिः ॥ न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः ॥ तस्यापि स्वरूपयोग्यत्वा

त् ॥ महत्त्वलक्षणकारणांतरासंनिधानाच्च न प्रत्यक्षं अथवा आत्मावृत्तिविशेषगुणवत्त्वं ॥ चत्वारीति ॥ चत्वा

रि स्पर्शवंति हि ॥ २६ ॥ पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वं ॥ द्रव्यारंभ इति ॥ पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारंभकत्वं

न च द्रव्यानारंभके घटादावव्याप्तिः ॥ द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥ × द्रव्या ९

रंभश्चतुर्षु स्यादथा ॥ × आकाशशरीरिणामिति ॥ आकाशशरीरिणां ॥ अव्याप्यवृत्तिः क्षणिको विशेषगुण इ

ष्यते ॥ २७ ॥ आकाशात्मनामव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं ॥ आकाशस्य हि विशेषगुणः शब्दः स च अव्याप्य

वृत्तिः ॥ यदा किंचिदवच्छेदेन शब्द उत्पद्यते तदान्यावच्छेदेन तदभावस्यापि सत्त्वात् ॥ क्षणिकत्वं च तृतीयक्षणवृ

त्तिध्वंसप्रतियोगित्वं ॥ योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वात् ॥ प्रथमशब्दस्य द्वितीयशब्देन नाशः

एवं ज्ञानादीनामपि ॥ ज्ञानादिकं हि आत्मनि किंचिच्छरीरावच्छेदेन नोत्पद्यते घटावच्छेदेन तदभावोस्त्येव ॥ एवं

ज्ञानादिकमपि क्षणद्वयावस्थायि ॥ इत्थं चाव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं चार्थः ॥ पृथिव्या

दौ रूपादिविशेषगुणोस्ति स न व्याप्यवृत्तिरित्युक्तं ॥ तत्रैवाव्याप्यवृत्तिः संयोगादिरस्तीति विशेषगुणेत्युक्तं ॥ न च रू

पादीनामपि कदाचित्तृतीयक्षणे नाशसंभवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यं ॥ चतु

क्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात् ॥ अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति ॥ क्षणचतुष्ट

यं तु न किमपि ज्ञानादिकं तिष्ठति ॥ रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तत इति तद्व्युदासः ॥ ईश्व

सि·मु· रज्ञानस्य चतुःक्षणवृत्तित्वाज्ज्ञानत्वस्य तादृशवृत्तित्वाज्जन्यैत्युक्तं ॥ यद्याकाशजीवात्मनोः साधर्म्यं तदाजन्ये
तिनदेयं ॥ द्वेषत्वादिकमादाय लक्षणसमन्वयात् ॥ परममहत्त्वस्य तादृशगुणत्वाच्चतुर्थक्षणे द्वित्वादीनामपिना
१० शाभ्युपगमात्तद्वारणाय विशेषेति ॥ त्रिक्षणवृत्तित्वं वा वाच्यं ॥ इच्छादिकमादाय लक्षणसमन्वयात् ॥ रूपद्रव
त्वप्रत्यक्षयोगिनः प्रथमास्त्रयः ॥ पृथिव्यप्तेजसां रूपवत्त्वं द्रववत्त्वं प्रत्यक्षविषयत्वं चेत्यर्थः ॥ न च
चक्षुरादीनां भर्जनकपालस्थवह्नेरूष्मणश्च रूपवत्त्वे किं मानमिति वाच्यं ॥ तत्रापि तेजस्त्वेन रूपानुमानात् ॥
॥ एवं वायावानीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यं ॥ न च घटादावद्रु
तसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तिमिति वाच्यं ॥ द्रवत्ववद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वि
वक्षितत्वात् ॥ घृतजतुप्रभृतिषु जले द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वात् ॥ तत्र पृथिवीत्वादि सत्त्वान्तदा १०
दायलक्षणसमन्वयः ॥ न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तं रूपादावतिव्याप्तमिति वाच्यं ॥ चा

८ स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः ॥ स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ३० स्पर्शादयोऽष्टौ वेगश्च द्रवत्वं च गुरुत्वकं ॥ रूपं रसस्तथा स्नेहो
वारिण्येते चतुर्दश ३१ स्नेहहीना गंधयुक्ताः क्षितावेते चतुर्दश ॥ बुद्ध्यादिषट्कं संख्यादिपंचकं भावना तथा ३२ धर्माधर्मौ गुणा एते आत्मनः स्युश्चतु

क्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥ आत्मान्यतिव्याप्तिवारणाय चाक्षु
षेति ॥ गुरुणी द्वे इति ॥ गुरुणी द्वे रसवती ॥ गुरुत्ववत्त्वं रसवत्त्वं पृथिवीजलयोरित्यर्थः ॥ न च घ्राणेंद्रिया
दीनां वायवानीतपार्थिवादिभागानां च रसादिमत्त्वे किं मानमिति वाच्यं ॥ तत्रापि पृथिवीत्वादिना तदनुमा
नात् ॥ द्वयोरिति ॥ द्वयोर्नैमित्तिको द्रवः ॥ २८ ॥ पृथिवीतेजसोरित्यर्थः ॥ नन्वनैमित्तिकद्रवत्ववत्त्वं घटादाव
न्यादौ चाव्याप्तमिति चेन्न ॥ वाच्यं ॥ नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षित
त्वात् ॥ आत्मान इति ॥ आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ॥ पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेष
गुणवत्त्वमित्यर्थः ॥ यदुक्तमिति ॥ यदुक्तं तस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥ २९ ॥ ज्ञेयत्वादिकं विहायेति बो
ध्यं ॥ तत्तु नकस्यापि वैधर्म्यं केवलान्वयित्वात् ॥ ते च संख्यादयः पंच खे आकाशे ॥ साधर्म्यवैधर्म्ये निरूप्य
संप्रति प्रत्येकं पृथिव्यादिकं निरूपयति ॥ तत्र क्षितिरित्यादिना ॥ गंधहेतुरिति ॥ गंधसमवायिकारणमि

र्दश ॥ संख्यादिपंचकं कालदिशोः शब्दश्च ते च खे ३३ संख्यादयः पंच बुद्धिरिच्छा यत्नोऽपि चेश्वरे ॥ परापरत्वे संख्याद्याः पंच वेगश्च मानसे ३४ शब्दो
नविकादशा तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश ॥ दिक्कालयोः पंच षडेव चांबरे महेश्वरेऽष्टौ मनसस्तथैव च ॥ ३५ ॥ २

सि·मु· त्यर्थः ॥ यद्यपिगंधवत्त्वमात्रलक्षणमुचितं तथापिपृथिवीत्वजातौप्रमाणोपन्यासायकारणत्वमुपन्यस्तं ॥ त
वी थाहि ॥ पृथिवीत्वंगंधसमवायिकारणतावच्छेदकतयासिध्यति ॥ अन्यथागंधत्वावच्छिन्नस्याकस्मिकत्वापत्तेः ॥
नचपाषाणादौगंधाभावाद्गंधवत्त्वमव्याप्तमितिवाच्यं ॥ तत्रापिसत्वात् ॥ अनुपलब्धिस्तु अनुत्कटेनाप्युपपद्यते गंध
कथमन्यथातद्भस्मनिगंधउपलभ्यते ॥ भस्मनोहिपाषाणध्वंसजन्यत्वात्पाषाणोपादानोपादेयत्वंसिध्यति ॥
यद्द्रव्यंयद्द्रव्यध्वंसजन्यंतत्तदुपादानोपादेयमितिव्याप्तेः ॥ दृष्टंचैतत्खंडपटेमहापटध्वंसजन्ये ॥ इत्थंचपाषाणपर
माणौ पृथिवीत्वात्तज्जन्यपाषाणस्यापिपृथिवीत्वं ॥ तथाचतस्यगंधवत्त्वेबाधकाभावः ॥ नानारूपवतीमिति
शुक्लनीलादिभेदेननानाजातीयंरूपंपृथिव्यामेववर्त्तते ॥ नतुजलादौ ॥ तत्रशुक्लस्यैवसत्वात् ॥ पृथिव्यांतुए
कस्मिन्नपिधर्मिणिपाकवशेननानारूपसंभवात् ॥ नचयत्रनानारूपंनोत्पन्नंतत्राव्याप्तिः ॥ रूपद्वयवद्वृत्तिद्रव्य
त्वव्याप्यजातिमत्वस्यविवक्षितत्वात् ॥ रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वस्यविवक्षितत्वाद्वा ॥ वैशेषि

कनयेपृथिवीपरमाणौरूपनाशस्यरूपांतरस्यचसत्वात् ॥ न्यायनयेघटादावपितत्सत्वाल्लक्षणसमन्वयः ॥ ष
ड्विधस्तुरसस्तत्रेति ॥ मधुरकटुकषायादिभेदेनषड्विधोरसःपृथिव्यामेव ॥ जलेतुमधुरएवरसः ॥ अत्रापि
पूर्ववद्रसद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्वंलक्षणार्थोवसेयः ॥ गंधस्तुद्विविधोमतइति ॥ द्विविधइतिवास्त
स्ति तिमात्रं ॥ नतुद्विविधगंधवत्त्वमपिलक्षणं ॥ द्विविधगंधवत्त्वस्यव्यर्थत्वात् ॥ द्वैविध्यंचसौरभासौरभभेदे
नबोध्यं ॥ स्पर्शइति ॥ स्पर्शस्तस्यास्तुविज्ञेयोह्यनुष्णाशीतपाकजः ॥ तस्याःपृथिव्याःअनुष्णाशीतत्वंना तस्पर्श
यावपिवर्त्ततइत्युक्तं ॥ पाकजइति ॥ इत्थंचपृथिव्याःस्पर्शोऽनुष्णाशीतइतिज्ञापनार्थंतदुक्तं ॥ पाकजस्प
र्शवत्त्वमात्रंलक्षणं ॥ अधिकस्यवैयर्थ्यात् ॥ यद्यपिपाकजस्पर्शःपटादौनास्तितथापिपाकजस्पर्शवद्वृ
त्तिद्रव्यत्वव्याप्यजातिमत्वमर्थोबोध्यः ॥ नित्येति ॥ नित्यानित्याचसाद्वेधानित्यास्यादणुलक्षणा ॥ ३७
अनित्यातुतदन्यास्यात्सैवावयवयोगिनी ॥ सा ॥ पृथिवीद्विविधा ॥ नित्याऽनित्याचेत्यर्थः ॥ अ

सि॰ मु॰ णुलक्षणा परमाणुरूपा नित्या ॥ तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिः सर्वाप्यनित्येत्यर्थः ॥ सैवावयनि
त्पाद्यपृथिव्येव अवयवतीत्यर्थः ॥ ननु अवयविनि किं मानं ॥ परमाणुपुंजैरेवोपपत्तेः ॥ नच परमाणूनां अतींद्रियत्वा
१२ त् घटादीनामप्रत्यक्षत्वं न स्यात् इति वाच्यं ॥ एकस्य परमाणोरप्रत्यक्षत्वेपि तत्समूहप्रत्यक्षत्वात् ॥ यथैकस्य
केशस्य दूरे ऽप्रत्यक्षत्वेतत्समूहस्य प्रत्यक्षत्वं ॥ नचैकः स्थूलो घट इति रनुपपत्तिरिति वाच्यं ॥ एको महान्धा बुद्धे
ड न्यराशिरितिवदुपपत्तेः ॥ मैवं ॥ परमाणोरतींद्रियत्वेन तत्समूहस्यापि प्रत्यक्षायोगात् ॥ दूरस्थकेशस्तु ना
तींद्रियः सन्निधानेन तस्यैव प्रत्यक्षत्वात् ॥ अन्यथा चक्षुरश्म्यादिसंततेः कदाचिद्दृश्यत्वप्रसंगात् ॥
अदृशस्य दृश्यानुपादानत्वात् ॥ × नच तदानीं दृश्यपरमाणुपुंजस्योत्पन्नत्वान्न प्रत्यक्षविरोध इति
नु वाच्यं ॥ अदृशस्य दृश्यानुपादानत्वात् ॥ × नचातितप्ततैलादौ कथमदृश्याद्दहनसंततेर्दृश्यदहनो १२
त्पत्तिरिति वाच्यं ॥ तत्र तदंतःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात् ॥ नचादृश्येन
स्वीकारात्

द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यं ॥ यतो न वयं दृश्यत्वमदृश्यत्वं वा कस्यचित्स्वभावादाचक्ष्महे ॥ प
रंतु महत्त्वोद्भूतरूपादिकारणसमुदायवशात् दृश्यत्वं तदभावाच्चादृश्यत्वं ॥ तथा च दृश्यत्रसरेणोर्महत्त्वात्प्रत्यक्षं ॥ न त्र
तु द्व्यणुकादेस्तदसंभवात् ॥ नहि तन्मतेपीदं संभवति ॥ परमाणौ महत्त्वाभावात् ॥ इत्थं चावयविसिद्धौ तेषामुत्पादवि
नाशयोः प्रत्यक्षत्वादनित्यत्वं ॥ एतेषां चावयवधारायाः अनंतत्वे मेरुसर्षपयोरपि साम्यप्रसंगः ॥ अतः क्वचिद्वि
श्रामो वाच्यः ॥ यत्र तु विश्रामस्तस्यानित्यत्वे असमवेतकार्योत्पत्तिप्रसंगात् ॥ तस्य नित्यत्वं ॥ महत्परिमाण भाव५
स्य तारतम्यस्य गगनादौ विश्रांतत्वमिव अणुपरिमाणतारतम्यस्यापि क्वचिद्विश्रांतत्वमस्तीति तस्य परमाणु
त्वसिद्धिः ॥ न च त्रसरेणावेव विश्रामोस्त्विति वाच्यं ॥ त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् ॥ घटवत् ॥ इत्य
नुमानेन तदवयवसिद्धौ ॥ त्रसरेणोरवयवाः सावयवाः महदवयवत्वात् कपालवदित्यनुमानेन तदवय
वसिद्धिः ॥ न चेदमप्रयोजकं ॥ अपकृष्टमहत्त्वं प्रति अनेकद्रव्यस्य प्रयोजकत्वात् ॥ न चैवं क्रमेण तदवयव
सावयवारम्भद्रव्यत्वस्य

धारापि सिध्येदिति वाच्यं ॥ अनवस्थाभयेन तदतःसिद्धेरिति ॥ सेति ॥ सा च त्रिधा भवेद्देह इंद्रियं विषयस्तथा ॥
१३ सा कार्यरूपा पृथिवी त्रिविधा ॥ शरीरेंद्रियविषयभेदादित्यर्थः ॥ तत्र देहमुदाहरति ॥ योनिजादिभवेद्देहं ॥
जं योनिजमयोनिजं चेत्यर्थः ॥ योनिजमपि जरायुजमंडजं च ॥ जरायुजं मानुषादीनां ॥ अंडजं पक्षिसर्पादीनां ॥ अ
योनिजं स्वेदजोद्भिज्जादिकं ॥ स्वेदजाः कृमिदंशाद्याः ॥ उद्भिज्जास्तरुगुल्माद्याः ॥ नारकीणां शरीरमप्ययो
निजं ॥ न च मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यं ॥ गंधादिमत्त्वस्यैव प्रमाणत्वात् ॥ न च क्लेदो
ष्मादेरुपलंभादाप्यत्वादिकमपि स्यादिति वाच्यं ॥ तथा सति जलत्वपृथिवीत्वादिना संकरप्रसंगात् ॥ तर्हि
जलत्वादिकमेवास्तु ॥ न तु पार्थिवमिति वाच्यं ॥ क्लेदादीनां विनाशेपि शरीरत्वेन प्रत्यभिज्ञानात् ॥ गंधाद्युपल
ब्धेश्च पृथिवीत्वसिद्धेः ॥ तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यं ॥ शरीरत्वं तु न जातिः ॥ पृथिवी १३
त्वादिना सांकर्यात् ॥ किंतु चेष्टाश्रयत्वं ॥ वृक्षादीमपि चेष्टाश्रयत्वान्नाव्याप्तिः ॥ न च वृक्षादेः शरीरत्वे किं मा
ना

नमिति वाच्यं ॥ आध्यात्मिकवायुसंबंधस्य प्रमाणत्वात् ॥ तत्रैव किं मानमिति चेत् ॥ भग्नक्षतसंरोहणादिना तदु
न्नयात् ॥ यद्देहस्यादौ शरीरव्यवहारो न भवति तदा अंत्यावयवित्वेन विशेषणीयं ॥ न च यत्र शरीरे चेष्टा न जाता तत्राव्या
प्तिरिति वाच्यं ॥ तादृशे प्रमाणाभावात् ॥ अथवा चेष्टावदंत्यावयववृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं ॥ अंत्यावयविमात्रवृ
त्ति चेष्टावद्वृत्तिजातिमत्त्वं वा ॥ तत्तन्मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः ॥ न च नृसिंहशरीरे कथं लक्षणसम
न्वयः ॥ तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावात् ॥ जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभा
वादिति वाच्यं ॥ कल्पभेदेन नृसिंहशरीरस्य नानात्वेन लक्षणसमन्वयात् ॥ इंद्रियमिति ॥ इंद्रियं घ्राणलक्षणं ॥ घ्राणें
द्रियं पार्थिवमित्यर्थः ॥ पार्थिवत्वं कथमिति चेदित्थं ॥ घ्राणेंद्रियं पार्थिवं रूपादिषु पंचसु मध्ये गंधस्यैव व्यंजकत्वात् ॥
कुंकुमगंधाभिव्यंजकघृतादिवत् ॥ न च दृष्टांते रूपादिव्यंजकत्वादसिद्धिरिति वाच्यं ॥ परकीयरूपाद्यव्यंजकत्वस्य
तदर्थत्वात् ॥ न च नवशरावगंधव्यंजकजलेनानैकांतिकत्वमिति वाच्यं ॥ तस्य सक्तुरसाभिव्यंजकत्वात् ॥ यद्वा परकी

सि॰मु॰ येतिन देयं ॥ वायूपनीतसुरभिभागस्य दृष्टांतत्वसंभवात् ॥ नच घ्राणेंद्रियसन्निकर्षस्य गंधमात्रव्यंजकत्वा
त्तत्र व्यभिचार इति वाच्यं ॥ द्रव्यत्वे सतीति विशेषणात् ॥ विषय इति ॥ विषयो द्व्यणुकादिस्तु ब्रह्मांडांत उदाहृतः ॥
१४ ३९ ॥ उपभोगसाधनं हि विषयः ॥ सर्वमेव कार्यजातमदृष्टाधीनं ॥ यच्च कार्यं यददृष्टाधीनं तत्तदुपभोगं साक्षा
त्परंपरया वा जनयत्येव ॥ नहि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति ॥ तेन द्व्यणुकादिकं ब्रह्मांडांतं स
र्वमेव विषयो भवति ॥ शरीरेंद्रिययोर्विषयत्वेपि प्रकारांतरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः ॥ जलं निरूपयति
वर्णः शुक्ल इति ॥ स्नेहसमवायिकारणतावच्छेदकतया जलत्वं जातिः सिध्यति ॥ यद्यपि स्नेहत्वं नित्यानित्यवृ
त्तितया न कार्यत्वावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यं ॥ अथ परमाणौ जलत्वं न स्यात् जन्यस्नेहाभावा
त् ॥ तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभाव इति चेन्न ॥ जन्यस्नेहजनकतावच्छेदिकाया जन्यजल १४
त्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदिकया जलत्वजातिसिद्धेः ॥ शुक्लरूपमेव जलस्येति दर्शयितुमु

क्तं वर्णः शुक्ल इति ॥ न तु शुक्लरूपवत्त्वं लक्षणं ॥ अथवा नैमित्तिकद्रवत्ववद्वृत्ति शुक्लरूपवद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्यजा
तिमत्त्वं ॥ अभास्वरशुक्लेतररूपासमानाधिकरणरूपवद्वृत्ति द्रव्यत्वसाक्षाद्व्याप्य ॥ जातिमत्त्वं ॥ वा तदर्थः ॥ तेन
स्फटिकादौ नातिव्याप्तिः ॥ रसस्पर्शाविति ॥ रसस्पर्शौ जले मधुरशीतलौ ॥ जलस्य मधुर एव रसः ॥
साक्षात् ॥ शीत एव स्पर्शः ॥ तिक्तादीतरमधुरवृत्ति द्रव्यत्वव्याप्यजातिमत्त्वं ॥ शीतेतरस्पर्शावद्वृत्ति शीतस्पर्शवद्वृत्तिजातिमत्त्वं वा तदर्थः
ननु शुक्लरूपमेवेति कुतः ॥ कालिंदीजलादौ नीलिमोपलब्धेरिति चेन्न ॥ नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरसत्त्वा
त् ॥ जले नीलत्वस्यासंभवात् ॥ नीलत्वप्रतीतिस्त्वाश्रयौपाधिकी ॥ अत एव वियति विक्षेपे धवलिमोपलब्धिः ॥ अथ
जले माधुर्ये किं मानं नहि प्रत्यक्षेण कोपि रसस्तत्रानुभूयते ॥ नच नारिकेरजलादौ माधुर्यमुपलभ्यत एवेति वाच्यं ॥
तस्याश्रयौपाधिकत्वात् ॥ अन्यथा जंबीररसादौ अम्लोपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न ॥ हरीतक्या
दिभक्षणस्य जलरसव्यंजकत्वात् ॥ न च हरीतक्यामेव जलोष्मसंयोगाद्रसांतरोत्पत्तिरिति वाच्यं ॥ कल्पनागौर

सि॰मु॰ वात्॥ पृथिवीत्वस्याम्लजनकतावच्छेदकत्वाच्च जले नाम्लादिकं। जंबीरकरवीररसादौ त्वाश्रयोपाधिकीलपा
प्रतीतिः एवं च अनुष्णाशीतस्पर्शजनकतावच्छेदकं जलत्वं बोध्यं। घृष्टचंदनात्तु दौशैत्योपलब्धिश्चंदनांतर्वर्तिशिल
स्पर्शवत् सलिलस्य। तेजःसंयोगाज्जले औष्ण्यप्रतीतिरौपाधिकी स्फुटैव॥ तत्र पाकासंभवात्॥ स्नेहस्तत्रेति॥ घृतादा
वपि तदंतर्वर्तिजलस्यैव स्नेहः॥ जलस्य स्नेहसमवायिकारणत्वात्॥ तेन जल एव स्नेह इति मंतव्यं॥ द्रवत्वेति॥ द्रवत्वं तु सां
सिद्धिकमुदाहृतं ४०॥ नित्यतादि॥ सांसिद्धिकं द्रवत्वं जातिविशेषः प्रत्यक्षसिद्धः तज्जनकतावच्छेदकमपि तदेवेति भा
वः॥ तैलादावपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति॥ प्रथमवदिति॥ पृथिव्या इवेत्यर्थः॥ तथा
हि जलं द्विविधं॥ नित्यमनित्यं च। परमाणुरूपं नित्यं। द्व्यणुकादिकं सर्वमनित्यमवयवसमवेतं च। अनित्यमपि त्रिवि
धं। शरीरेंद्रियविषयभेदात्। पृथिवीतो यो विशेषस्तमाह॥ किं त्विति॥ किंतु देहमयोनिजं॥ अयोनिजमेवेत्यर्थः।
जलीयशरीरमयोनिजं वरुणलोके प्रसिद्धमिति। इंद्रियं रसनमिति॥ जलीयमित्यर्थः॥ तथाहि॥ रसनं जलीयं पर १५
कीयगंधाद्यव्यंजकत्वे रसव्यंजकत्वात् सक्तुरसाभिव्यंजकजलवत्। रसनसन्निकर्षे व्यभिचारवारणाय द्रव्य

त्वं देयं॥ विषयं दर्शयति॥ सिंधुहिमादिर्विषयो मतः॥ सिंधुः समुद्रः। हिमं तुषारः। आदिपदात् सरित्कासारकरकादिः सर्वो ग्राह्यः।
न च हिमकरकयोः कठिनत्वात् पार्थिवत्वमिति वाच्यं॥ ऊष्मणा विलीनयोस्तयोर्जलत्वस्य प्रत्यक्षसिद्धत्वात्॥ यद्द्र
व्यपद्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः। अदृष्टविशेषेण द्रवत्वप्रतिरोधात्करकायां काठिन्य
प्रत्ययस्य भ्रांतत्वात्। तेजो निरूपयति। उष्णस्पर्श इति॥ उष्णस्पर्शस्तेजसः स्यात्॥ उष्णत्वं स्पर्शनिष्ठो जातिवि
शेषः प्रत्यक्षसिद्धः। इत्थं च जन्योष्णस्पर्शासमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः। तस्य परमाणुवृत्तित्वं
तु जलस्येवानुसंधेयं। न चोष्णस्पर्शवत्त्वं चंद्रकिरणादावव्याप्तमिति वाच्यं। तत्रापि औष्ण्यस्य सत्त्वात्। किंतु
तदंतःपातिजलस्पर्शेनाभिभवादग्रहः। एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवाच्चक्षुरादौ चानुद्भूतत्वात्तदग्र
हः। रूपमिति। रूपं शुक्लं भास्वरं। वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाभिभवाच्छुक्लरूपाग्रहः। तद्रूपाग्रहे
धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेन्न। अन्यदीयरूपेणैव धर्मिणो ग्रहसंभवात्। शंखस्यैवापि तत्पीतिम्नो॥ व
वा

नित्यतादि च २ द्रवत्वं त्रि-

सि॰मु॰ ।केऽस्तु शुक्लरूपं नाभिभूतं किंतु तदीयं शुक्लत्वमभिभूतमित्यन्ये ॥ नैमित्तिकं भिति ॥ सुवर्णादिरूपे तेजसि तत्सत्त्वात् ॥
न च नैमित्तिकद्रवत्ववत्त्वं लक्षणं ॥ दहनादावव्याप्तं घृतादावतिव्याप्तं चेति वाच्यं ॥ पृथिव्यवृत्तिनैमित्तिकद्रवत्ववद्
१६ वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वस्य विवक्षितत्वात् ॥ पूर्ववदिति ४२ ॥ जलरूपस्येवेत्यर्थः ॥ तथाहि ॥ द्वितिविधा ॥ नि
त्यमनित्यं च ॥ परमाणुरूपं नित्यं ॥ तदन्यमनित्यमवयवि च ॥ तच्च त्रेधा ॥ शरीरेन्द्रियविषयभेदात् ॥ शरी
रमयोनिजमेवेति ॥ तच्च सूर्यलोके प्रसिद्धं ॥ अत्र यो विशेषस्तमाह ॥ इंद्रियं नयनं ॥ चक्षुषस्तैजस
त्वे किं मानमिति चेत् ॥ उच्यते ॥ चक्षुस्तैजसं परकीयस्पर्शाद्यव्यंजकत्वे सति परकीयरूपव्यंज
कत्वात् ॥ प्रदीपवत् ॥ प्रदीपस्य स्वीयस्पर्शव्यंजकत्वादाद्यं परकीयेति निदेयं ॥ चक्षुःसन्निकर्षव्यभिचारवारणाय
द्रव्यत्वं देयं ॥ विषयं दर्शयति ॥ वह्निः स्वर्णादिर्विषया मतः ॥ ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न ॥ सुवर्णं तैज १६
सं असति प्रतिबंधके अत्यंतानलसंयोगेऽप्यनुच्छिद्यमानद्रवत्वाधिकरणत्वात् ॥ यन्नैवं तन्नैवं यथा पृथिवी ॥
२ घटादेः स्वीयरूपव्यंजकत्वाद्व्यभिचारवारणाय द्वितीयं परकीयेति ॥ अथवा प्रभाया दृष्टान्तत्वसंभवादाद्यं परकीयेति २

न चाप्रयोजकं ॥ पृथिवीद्रवत्वस्य जलद्रवत्वस्य चात्यंताग्निसंयोगनाश्यत्वात् ॥ जलद्रवत्वस्य सांसिद्धिकत्वाच्च
ननु पीतिमगुरुत्वाश्रयस्य पार्थिवभागस्यापि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न ॥ जलमध्यस्थमषीवदद्रुत
तस्याद्रुतत्वात् ॥ अपरे तु पीतिमाश्रयस्यात्यंताग्निसंयोगेऽपि पूर्वरूपापरावृत्तिदर्शनात् ॥ तत्प्रतिबंधकविजातीयद्र
वद्रव्यं कल्प्यते ॥ तथाहि ॥ अग्निसंयोगी पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तः ॥ अत्यंता
नलसंयोगेऽपि पूर्वरूपपरावृत्तिदर्शनात् ॥ विजातीयरूपानधिकरणत्वात् ॥ तत्र जलमध्यस्थपीतपटवत् ॥ तस्य
च पृथिवीजलभिन्नस्य तेजस्त्वनियमात् ॥ वायुं निरूपयति ॥ अपाकजेति ॥ अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ॥
४३ ॥ तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिंगकः ॥ अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वादुक्तमपाकजेति ॥ अपा
कजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीतेति ॥ एतेन वायो विजातीयस्पर्शो दर्शितः ॥ तज्जनकतावच्छेदकं वा
युत्वमिति भावः ॥ एषः वायुः स्पर्शादिलिंगकः ॥ वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते ॥ विजातीयस्पर्शो विलक्षणशब्दे
न तृणादीनां धृतिः शाखादीनां कंपेन वायोरनुमानात् ॥ यथा च वायुर्न प्रत्यक्षस्तथाग्रे वक्ष्यते ॥ पूर्ववदिति ॥ पूर्ववन्नित्य

मु०दि०टी० ताद्युक्तं॥वायुर्द्विविधोनित्योनित्यश्च॥परमाणुरूपोनित्यः॥तदन्योनित्यःसमवेतश्च॥सोपित्रिविधः॥शरीरेंद्रियविषय
१७॥ भेदात्॥तत्रशरीरमयोनिजंपिशाचादीनां॥परंतुजलीयतैजसवायवीयशरीराणांपार्थिवभागोपष्टंभादुपभोगक्षमत्वं॥
जलादीनांप्राधान्याज्जलीयत्वादिकमेवेति॥अत्रयोविशेषस्तमाह॥देहव्यापित्वगिंद्रियं॥४४॥शरीरव्यापकंस्पर्शग्राह
कमिंद्रियंत्वक्॥तच्चवायवीयं॥रूपादिषुपंचसुमध्येस्पर्शस्यैवव्यंजकत्वात्॥अंगसंगिसलिलशैत्या
भिव्यंजकव्यजनपवनवत्॥विषयंदर्शयति॥प्राणादिरिति॥प्राणादिस्तुमहावायुपर्यंतोविषयो
मतः॥यद्यपिअनित्योवायुश्चतुर्विधस्तस्यचतुर्थोविधाप्राणादिरित्युक्तमाकरतथापिसंक्षेपा
देवत्रैविध्यमुक्तं।प्राणस्त्वेकएवहृदादिनानास्थानवशान्मुखनिर्गमनादिनानाक्रियावशात्ना
नासंज्ञांलभते॥आकाशंनिरूपयति॥आकाशस्येति॥आकाशस्यतुविज्ञेयःशब्दोवैशेषिको शर्वोम्
गुणः॥४५॥आकाशकालदिशामेकैकव्यक्तिकत्वादाकाशत्वादिकंनजातिः॥किंत्वाकाशत्वंशब्दा ॥१७॥
श्रयत्वं॥वैशेषिकइतिकथनंतुविशेषगुणांतरव्यवच्छेदाय॥एतेनप्रमाणमपिदर्शितं॥तथाहि॥शब्दोविशेषगुण

६ स्वाश्रयनाशजन्यशेनोप्रतियोगिभिन्नत्वात्

श्चक्षुर्ग्रहणायोग्यबहिरिंद्रियग्राह्यजातिमत्वात्स्पर्शवत्।शब्दोद्रव्यसमवेतोगुणत्वात्।संयोगवदित्यनुमाने
नत्राश्रयस्यद्रव्यसमवेतत्वेसिद्धे।शब्दोनस्पर्शवद्विशेषगुणः।अग्निसंयोगासमवायिकारणकत्वाभावेसतिअका
रणगुणपूर्वकप्रत्यक्षत्वात्।सुखवत्।पाकजरूपादौव्यभिचारवारणायसत्यंतं।पटरूपादौव्यभिचारवारणायका
रणगुणपूर्वकेति।जलपरमाणुरूपादौव्यभिचारवारणायप्रत्यक्षेति।नदिक्कालमनोगुणोविशेषगुणत्वात्।नात्म
विशेषगुणःबहिरिंद्रिययोग्यत्वात्।रूपवत्।इत्थंचशब्दाधिकरणंनवमंद्रव्यंगगननामकंसिध्यतीति।नचवा
व य्वंधवेषुसूक्ष्मशब्दक्रमेणवायौकारणगुणपूर्वकःशब्दउत्पद्यतामितिवाच्यं।अयावद्द्रव्यभावित्वेनवायुवि
शेषगुणत्वाभावात्।तत्रचशरीरस्यविषयस्यचाभावात्इंद्रियंदर्शयति।इंद्रियमिति।नन्वाकाशंला
घवादेकंसिद्धं।श्रोत्रंपुरुषभेदाद्भिन्नंकथमाकाशंस्यादतआह॥×इंद्रियंतुभवेच्छ्रोत्रमेकःसन्नप्युपाधितः॥आकाश मे
मेकःसन्नप्युपाधेःकर्णशष्कुल्याःभेदाद्भिन्नंश्रोत्रात्मकंभवतीत्यर्थः॥कालंनिरूपयति॥जन्यानामिति।तत्र

सि॰ मु॰ जन्यानां जनकः कालः॥ तत्र प्रमाणं तु दर्शयितुमाह॥ जगतामिति॥ जगतामाश्रयो मतः॥४६॥ तथाहि॥ इदानीं घट इत्यादि
प्रतीतिः सूर्यपरिस्पंदादिकं यदि विषयीकरोति तदा सूर्यपरिस्पंदादिना घटादेः संबंधो वाच्यः॥ स च संयोगादिर्न भवतीति काले
१८ एव संबंधघटकः कल्प्यते॥ इत्थं च तस्याश्रयत्वमेव सम्यक्॥ प्रमाणांतरं वदति॥ परापरत्वधीहेतुरिति॥ परत्वा[illegible]दु अ
साधारणनिमित्तं काल एव॥ परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो[illegible]तिरिक्तः कल्प्यत इति भावः॥ ननु
एकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आह क्षणादिः स्यादुपाधित इति कालस्त्वेको
ऽप्युपाधिभेदात् क्षणादिव्यवहारादिविषयः४ उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म॥ पूर्वसंयोगा
वच्छिन्नविभागो वा॥ पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा॥ उत्तरसंयोगावच्छिन्नं कर्मैव वा॥ न चोत्तरसं र
योगानंतरं क्षणव्यवहारो न स्यादिति वाच्यं॥ कर्मांतरसत्त्वादिति। यदि च महाप्रलये क्षणादिव्यवहारोऽस्ति तदा अ
नागत्याध्वंसेनैवोपपादनीयः॥ दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरिति॥ दिशं निरूपयति॥ दूरांतिकेति॥ श्रीरामं
दूरांतिकादिधीहेतुरेका नित्या दिगुच्यते ४७ दूरत्वमंतिकत्वं च दैशिकं परत्वमपरत्वं च बोध्यं॥ तद्बुद्धेरसा १८

धारणं बीजं दिगेव। दैशिकपरत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया दिक्सिध्यतीति भावः। ननु एकै
व दिक् यदि तदा प्राचीप्रतीच्यादिव्यवहाराः कथमुपपद्यतामत आह॥ उपाधिभेदादेकापि प्राच्यादिव्यपदेशभागि
ति॥ यद्दायत्तु पुरुषस्योदयगिरिसन्निहिता या दिक् तदा तत्पुरुषस्य सा प्राची॥ एवमुदयगिरिव्यवहिता च प्रतीची॥ ए
वं तत्पुरुषस्य मेरुसंनिहिता दिगुदीची॥ तद्व्यवहिता त्ववाची॥ सर्वेषामेव वर्षाणां मेरुरुत्तरसंस्थित इति नियमात्॥ रो
आत्मानं निरूपयति॥ आत्मेंद्रियाद्यधिष्ठातेति॥ आत्मत्वं जातिः। सुखदुःखसमवायिकारणतावच्छेदकतया सिध्यति या
ईश्वरेऽपि सा जातिरस्ति॥ अदृष्टादिरूपकारणाभावात्॥ न सुखदुःखोत्पत्तिः॥ नित्यस्य स्वरूपयोग्यस्य फलावश्यंभावनि ले
यमस्याप्रयोजकत्वात्। परे तु ईश्वरे सा जातिर्नास्त्येव॥ प्रमाणाभावात्। न च दशमद्रव्यत्वापत्तिः। ज्ञानवत्त्वेन विभाज
नादित्याहुः। इंद्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः। यद्यपि आत्मनि अहं जानेऽहं सुखी इत्यादिप्रत्यक्षवि
षयत्वमस्त्येव॥ तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्त्वात्मेतिगोचर इति प्रतिपादयितुं

सि॰मु॰ ॥ नशक्यतइत्यतः प्रमाणांतरंदर्शयति ॥ करणंहीति ॥ करणंहिसकर्तृकं ।४८। वास्यादीनांछिदाकरणानां
१९ फलोपधानमपिकर्त्तारमंतरेणनोपपद्यतइत्यतिरिक्तःकर्त्ताकल्प्यते ॥ ननुशरीरस्यकर्तृत्वमस्त्वतआह ॥ शा
रीरस्यनचैतन्यंमृतेषुव्यभिचारतइति ॥ ननुचैतन्यंज्ञानादिकमेव । मुक्तात्मनांतन्मतइव मृतशरीराणामपितदभा
वेकाक्षतिः ॥ प्राणाभावेनज्ञानाद्यभावस्यसिद्धेरितिचेन्न । शरीरस्यचैतन्येबाल्येविलोकितस्यस्थविरस्यस्मर
प णानुपपत्तेः ॥ शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् ॥ नचपूर्वशरीरोत्पन्नसंस्कारेणद्वितीयश
रीरेसंस्कारउत्पद्यतामितिवाच्यं ॥ अनेकसंस्कारकल्पनागौरवात् ॥ एवंशरीरस्यचैतन्येबालकस्यप्रवृत्तिर्नस्यात् ।
इष्टसाधनताज्ञानस्यतद्धेतुत्वात् ॥ तदानीमिष्टसाधनतानुभावकाभावात् ॥ मन्मतेतुजन्मांतरानुभूतइष्टसाधनत्व श्रीः
स्यतदानींस्मरणादेवप्रवृत्तिः ॥ नचजन्मांतरानुभूतमन्यदपिस्मर्यतेतिवाच्यं ॥ उद्बोधकाभावात् ॥ अत्रत्वनायत्या १९
जीवनादृष्टमेवोद्बोधकंकल्प्यते ॥ इत्थंचसंसारस्यानादित्वयात्मनोनादित्वसिद्धावनादिभावस्यनाशासंभवा

न्नित्यत्वंसंभवतीतिबोध्यं ॥ ननुचक्षुरादीनांज्ञानादौकरणत्वंकर्तृत्वंचास्तु विरोधेबाधकाभावादतआह ॥
तथात्वंचेदिंद्रियाणामुपघातेकृति ॥ तथात्वंचैतन्यंउपघातेनाशेसति अर्थाच्चक्षुरादीनामेव ॥ कथंस्मृतिरिति ४९
पूर्वंचक्षुषासाक्षात्कृतानांचक्षुषोऽभावेस्मरणंनस्यात् ॥ अनुभवितुरभावादन्यस्यानुभूतस्यान्येनस्मरणा
संभवात्तदनुभवस्मरयोःसामानाधिकरण्येनकार्यकारणभावादितिभावः ॥ ननुचक्षुरादीनांचैतन्यंमास्तु ॥ मन
सस्तुनित्यस्यचैतन्यंस्यादतआह ॥ मनोपिनतथेति ॥ नतथानचेतनं ॥ ज्ञानादीति ॥ मनोभिन्नत्वेज्ञानाद्यन
ध्यक्षंतदाभवेत् ॥ मनसोणुत्वाच्चेत्यर्थः प्रत्यक्षेचमहत्त्वस्यहेतुत्वान्मनसिज्ञानस्यकरणादिमत्वेनत्वप्रत्यक्षानुपपत्तेरित्यर्थः ॥ य
थाचमनसोणुत्वंतथाग्रेवक्ष्यते ॥ नन्वस्तुविज्ञानमेवात्मा ॥ तस्यस्वतःप्रकाशरूपत्वाच्चेतनत्वं ॥ ज्ञानसुखादि
कंतस्यैवाकारविशेषः ॥ तस्यापिभावत्वात्क्षणिकत्वं ॥ पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञानेहेतुत्वात् ॥ सुषुप्ता
वप्यालयविज्ञानधारानिराबाधैव ॥ मृगमदवासनावासितवसनइवपूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञा

कर्त्वे विषयकत्वे

नसंक्रांतत्वाज्ज्ञानानुपपत्तिःस्मरणादेरितिचेन्न॥तस्यजगद्विषयेसर्वज्ञत्वापत्तेः।यत्किंचिद्विनिगमकाभावात्॥स्कुषुप्ताव
पिविषयावभासप्रसंगाच्च।तदानींनिराकाराचित्संततिरनुवर्ततइतिचेन्न।तस्यप्रकाशकत्वेप्रमाणाभावात्॥अन्य
थाघटादीनामपिज्ञानत्वापत्तिः।नचेष्टापत्तिर्विज्ञानव्यतिरिक्तवस्तुनोभावादितिवाच्यं।घटादेरनुभूयमानस्याप
लपितुमशक्यत्वात्॥आकारविशेषएवायंविज्ञानस्येतिचेत्॥किमयमाकारोतिरिच्यतेविज्ञानात्तर्हिसमायातंवि
ज्ञानव्यतिरिक्तेनवस्तुना।नातिरिच्यतेचेत्तर्हिसमूहालंबनेनीलाकारोपिपीताकारःस्यात्॥स्वरूपतोविज्ञानस्यावि
शेषात्।अपोहरूपानीलत्वादिर्विज्ञानधर्मइतिचेन्न॥नीलत्वादीनांविरुद्धानामेकस्मिन्नसमावेशात्॥इतरथावि
रोधावधारणस्यैवदुरुपपादत्वात्॥नचवासनासंक्रमःसंभवति।मातृपुत्रयोरपिवासनासंक्रमप्रसंगात्।पन
चोपादानोपादेयभावोनियामकइतिवाच्यं॥वासनायाःसंक्रमासंभवात्उत्तरस्मिन्नुत्पत्तिरेवसंक्रमइतिचे
न्न॥तदुत्पादकाभावात्॥चिंतामेवोत्पादकत्वेतदानंत्यप्रसंगात्॥क्षणिकविज्ञानेधातिशयविशेषकल्प्यते

[redacted]मानाभावात्।कल्पनागौरवाच्च॥एतेनक्षणिकशरीरेष्वेवचैतन्यमपिप्रयुक्तं।गौ
रवादितिशयेमानाभावाच्च।बीजादावपिसहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः।कुर्वद्रूपत्वाकल्पनात्॥अ
स्तुतर्हिक्षणिकविज्ञानगौरवान्नित्यविज्ञानमेवात्मा॥अविनाशीवारेयमात्मासत्यंज्ञानमनंतंब्रह्मेत्यादिश्रुते
रितिचेन्न॥तस्यविषयत्वासंभवस्यदर्शितत्वान्निर्विषयस्यज्ञानत्वेमानाभावात्सविषयस्य।पिअनुभववादतोज्ञा
नादिभिन्नोनित्यःआत्मेतिसिद्धं॥सत्यंज्ञानमितिब्रह्मपरंजीवेषुनोपयुज्यते॥ज्ञानाज्ञानसुखित्वासुखित्वादि
तिजीवानांभेदसिद्धौसुतरामीश्वरभेदः॥अन्यथाबंधमोक्षानुपपत्तेः॥योपीश्वराभेदबोधकोवेदःसोपितद्भेदेनै
तदपित्वंप्रतिपादयन्नुल्लाति॥अभेदरूपावेनेवयमितव्यमितिवदति।अतएवसर्वेष्वात्मानःसमर्पिताइतिश्रूय
ते॥मोक्षदशायामज्ञाननिवृत्तावभेदोजायतइत्यपिन॥भेदस्यनित्यत्वेननाशायोगात्॥भेदनाशेपिव्यक्तिद्वयं
स्थास्यत्येव॥नचद्वित्वमपिनश्यतीतिवाच्यं॥तवनिर्धर्मकेब्रह्मणिसत्यत्वाभावेपिसत्यस्वरूपंतादवद्वित्वा

भावोपिद्व्यात्मकोताविति स्फवचत्वात् ।। मिथ्यात्वाभावोधिकरणात्मकस्तत्र सत्यत्वमितिचेत् ।। कैरेंत्वांशावा
व्यक्तिद्व्यात्मकोद्वित्वमित्यप्युच्यतां ।। प्रत्येकमेकत्वेपिपृथिवीजलयोर्नगंधशीतवदुभयंनैकमितिस्यसर्वंअनास्ति
द्धत्वात् ।। योपितदानीमभेदप्रतिपादकआगमःसोपिनिर्दुःखत्वादिनासाम्यंप्रतिपादयति ।। संपदाधिक्येपुरोहितो
यंराजाद्वैसंतइतिवत् ।। अतएवनिरंजनःपरमंसाम्यमुपैतीतिश्रूयते ।। ईश्वरोपिनत्वानस्फखात्मा ।। किंतुज्ञानो
धाश्रयोनित्यंविज्ञानमानंदंब्रह्मेत्यादौविज्ञानपदेत्यास्से नज्ञानाश्रयत्ववोक्तेयः सर्वज्ञइत्याद्यनुरोधानंदं
दमित्यस्याप्यानंदवदित्यर्थः ।। आनंदोपिदुःखाभावेनोपचर्यते ।। भाराद्यपगमेसुखीसंवृत्तोहमितिवत् असुखवातस्मि
नं न्नानंदोनासावेदः ।। असुखमितिश्रुतेः ।। नविद्यतेसुखमस्येतिकुतोनार्थइतिचेन्न ।। कुष्टकस्यनापत्तेः ।। प्रकरण
य विरोधात् ।। आनंदमित्यत्रमत्वर्थश्रुत्यविरोधादितिसंक्षेपः ।। एतेनप्रकृतिःकर्त्री पुरुषःपुष्करपलाशवन्निर्लेपः श्रीः
किंतुचेतनः ।। कार्यकारणयोरभेदात्कार्यनाशेसतिकार्यरूपतयानाशेनस्यादित्यकारणत्वंतस्या बुद्धिगतचेत २१

न्याभिमानान्यथानुपपत्यातत्कल्पनं । बुद्धिश्चप्रकृतेःपरिणामः । सैवमहत्तत्त्वमंतःकरणमित्युच्यते । तत्सत्वासत्वाभ्यांपुरुष
स्यसंसारापवर्गौ । तस्याएवइंद्रियप्रणालिकयापरिणतिर्ज्ञानंरूपघटादिनासंबंधः । पुरुषेकर्तृत्वाभिमानो बुद्धेश्चेतन्याभि
मानश्चभेदाग्रहात् ।। ममेदंकर्तव्यमितिमदंशःपुरुषोपरागोबुद्धेःस्वच्छतयातत्प्रतिबिंबात्तात्त्विकोदर्पणस्येवमुखोपरागः ।
इदमितिविषयोपरागइंद्रियप्रणालिकयापरिणतिभेदस्तात्त्विकोनिश्वासाभिहतदर्पणस्येवमलिनिमा ।। कर्तव्यमितिव्यापारां
त्रय शः । तेनांशत्रयवतीबुद्धिः । तत्परिणामेनज्ञानेनपुरुषस्यातात्त्विकःसंबंधः । दर्पणमलिनिम्नेवमुखस्यानुपलब्धिरुच्यते । ज्ञानवत्सु
खदुःखेच्छाद्वेषप्रयत्नधर्माधर्माअपिबुद्धेरेवसामानाधिकरण्येनप्रतीतेः । नचबुद्धिश्चेतनापरिणामित्वात् । इतिमतमुपास्तं ।। कर्तृत्व
भोगानामिवचैतन्यस्यापिसामानाधिकरण्येनप्रतीतेः ।। चैतन्यांशेभ्रमइतिचेत्कर्तृत्वांशोपिकिंनेष्यते । अन्यथाबुद्धेर्नित्य
त्वेमोक्षाभावेअनित्यत्वेतत्पूर्वंसंसारापत्तिः । अचेतनायाःप्रकृतेःकार्यत्वाद्बुद्धेरचेतनत्वेकार्यकारणयोस्तादात्म्यादितिचे
न्नासिद्धेः । कर्तुर्जन्यत्वेमानाभावात् । वीतरागजन्मादर्शनात् ।। अनादित्वेअनादेर्नाशासंभवात् नित्यत्वंतत्किंप्रकृत्यादिकल्प
नेनतच्चप्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः । अहंकारविमूढात्माकर्ताहमितिमन्यतइत्यनेनविरोधइतिवाच्यं ।। प्रकृ
स२ ध

सि॰मु॰ तेरदृष्टस्य गुणैरदृष्टजन्यैरिच्छादिभिः। कर्त्ताहं कर्त्ताहमेवेत्यस्य तदर्थत्वात्॥ तत्रैवं सति कर्त्तारमात्मानं केवलं तु यदृष्ट्यादिवदत्ताभग
वताप्रकटीकृतो मुमुक्षुपरिष्ट्य दाशय इति संक्षेपः। धर्माधर्माश्रयोध्यक्ष इति॥ आत्मेत्युपुज्यते। शरीरस्य तदाश्रयत्वेन देहांतरकर्म
२२ णां देहांतरेण भोगानुपपत्तेः। विशेषगुणयोगतः। ५०। योग्यविशेषगुणसंबंधेनात्मनः प्रत्यक्षं भवति न त्वन्यथा। अहं जाने करोमीत्या
दिप्रतीतेः॥ प्रवृत्त्याद्यनुमेयोयं॥ अयमात्मा परदेहादौ प्रवृत्त्यादिनानुमीयते॥ प्रवृत्तिरत्र चेष्टा॥ ज्ञानेच्छाप्रयत्नादीनां देहेऽभाव
स्योक्तप्रायत्वात्। चेष्टायाश्च प्रयत्नसाध्यत्वात्। चेष्टया प्रयत्नवानात्मानुमीयत इति भावः॥ तत्र दृष्टांतमाह। रथगत्येव सारथिः।
यद्यपि रथकर्म चेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथानुमीयते तथा चेष्टात्मकेन कर्मणा परात्मापीति भावः। अहंकार
स्याश्रयोयमिति॥ अहंकारोहमितिप्रत्ययस्तस्याश्रयो विषय आत्मा न शरीरादिरिति॥ मनोमात्रस्य गोचर इति। ५१। मनोभि
न्नेंद्रियजन्यप्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः॥ रूपाद्यभावेनेंद्रियांतरायोग्यत्वात्॥ विभुरिति॥ विभुत्वं परममह
त्परिमाणवत्त्वं। तच्च प्रागुक्तमपि स्पष्टार्थमुक्तं॥ बुद्ध्यादिगुणवानिति॥ बुद्धिसुखदुःखेच्छाद्यश्चतुर्दशगुणाः पूर्वमुक्ता वे २२
दितव्याः। अत्रैव प्रसंगाद्बुद्धेः कतिपयं प्रपंचं दर्शयति॥ बुद्धिस्तु द्विविधा मतेति॥ द्वैविध्यं प्रत्यादयति॥ अनुभूतिः स्मृतिः

तानं श्च स्यादनुभूतिश्चतुर्विधा ५२ प्रत्यक्षमप्यनुमितिस्तथोपमितिशाब्दजेइति॥ एतासां चतसृणां कारणानि चत्वारि प्रमाणानि प्र
त्यक्षानुमानोपमानशब्दाः प्रमाणानीति सूत्रोक्तानि वेदितव्यानि॥ तत्रेंद्रियजन्यं प्रत्यक्षं। यद्यपि मनोरूपेंद्रियजन्यं सर्वमेव ज्ञा
ता नं तथापींद्रियत्वेन रूपेणेंद्रियाणां यत्र ज्ञाने कारणत्वं तत्प्रत्यक्षमेवेति विवक्षितं॥ ईश्वरप्रत्यक्षं तु न लक्ष्यं॥ इंद्रियार्थसन्निकर्षोत्प
म न्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति सूत्रे तथैवोक्तत्वात्॥ अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षं॥ अनुमितौ व्या
स्म प्तिज्ञानस्य उपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदज्ञानस्य स्मरणे अनुभवस्य करणत्वान्नातिव्याप्तिः॥ इदं लक्षणमीश्वरप्र
त्यक्षसाधारणं॥ परामर्शजन्यं ज्ञानमनुमितिः। यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि परामर्शजन्यहेत्वविषयकं ज्ञा
नमनुमितिः॥ न च कदाचिद्धेतुविषयकानुमितावव्याप्तिरिति वाच्यं॥ तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्
अथवा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः॥ एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः॥ पदज्ञानकरणकं ज्ञानं शाब्दबोधः॥
वस्तुतो यत्किंचिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तित्वे सति यत्किंचित्प्रत्यक्षाव्यक्तिमादाय तदवृत्तिजातिमत्त्वमनुमितित्वं॥
एवं यत्किंचित्प्रत्यक्षादिव्यक्तिमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षादिकं वाच्यमिति॥ प्रत्यक्षं विभजते॥

सि॰मु॰ घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतं ५२ घ्राणजं रासनं चाक्षुषं स्पार्शनं श्रोत्रं मानसमिति षड्विधं प्रत्यक्षं ॥ न चेश्वरप्रत्यक्ष
स्याविभागेन न्यूनत्वं ॥ जन्यप्रत्यक्षस्यैव निरूपणीयत्वात् ॥ उक्तसूत्रानुसारात् ॥ घ्राणस्य गोचरो गंधो गंधत्वादिरपि स्मृ
२२ तः इति ॥ ग्राह्य इत्यर्थः गंधत्वादिरित्यादिपदात् सुरभित्वादिपरिग्रहः । गंधस्य प्रत्यक्षत्वात् तद्वृत्तिजातिरपि प्रत्यक्षा गंधाश्रयग्रह
णे तु घ्राणस्य न सामर्थ्यमिति बोध्यं ॥ तथा रसो रसज्ञायास्तथा शब्दोपि च श्रुतेः ५४ रसत्वादिसहितस्तत्स्पर्शः ॥ तथा शब्दत्वा
रस दिसहितः गंधश्चोद्भूतो बोध्यः ॥ उद्भूतरूपं नयनस्य गोचरः इति ॥ ग्रीष्मोष्मादावनुद्भूतरूपमिति न तत्प्रत्यक्षं ॥ द्रव्याणि इति त
पृथक्त्वसंख्ये ॥ विभागसंयोगपरापरत्वस्नेहो द्रवत्वं परिमाणयुक्तं ॥ ५५ ॥ क्रिया जातिरिति ॥ उद्भूतरूपवंति ॥ योग्यवृत्तिः सम
वायश्च तादृशः ॥ पृथक्त्वादिकमपि योग्यव्यक्तिवृत्ति बोध्यं ॥ तादृशः योग्यव्यक्तिवृत्तिमित्यर्थः चक्षुर्योग्यत्वमेव कथं तदाह ॥ गृह्णा
तीति । गृह्णाति चक्षुः संबंधादालोकोद्भूतरूपयोः ५६ उद्भूतस्पर्शवद्द्रव्यं गोचरः सोपि च त्वचः आलोकसंयोगोद्भूतरूपं च चाक्षुषप्र
त्यक्षे कारणं । तत्र द्रव्ये चाक्षुषं प्रति तयोः समवायसंबंधेन कारणत्वं । द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसंबंधेन । द्रव्य
समवेतसमवेतप्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेनेति । उद्भूतस्पर्शवद्द्रव्यं च गोचरः सोपि उद्भूतस्पर्शः स्पर्शत्वादिसहि २२
तः । रूपान्यच्चक्षुषो योग्यं रूपमात्रापि कारणं ५७ ॥ द्रव्याध्यक्षे इति ॥ रूपभिन्नं रूपं रूपत्वादिभिन्नं चक्षुषो योग्यं त्वगिंद्रियस्या

यो

पि ग्राह्यं । तथा पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्या गुणा उक्ता एवं क्रिया एवं जातिर्योग्यवृत्तयश्च त्वचो ग्राह्या इति । अत्रापि त्वगिंद्रियज
न्येपि त्वगिंद्रियप्रत्यक्षे रूपं कारणं । तथा च बहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति । नवीनास्तु । बहिर्द्रव्यप्रत्यक्षेन रूपं कारणं प्रमा
णाभावात् ॥ किंतु चाक्षुषप्रत्यक्षे रूपं स्पार्शनप्रत्यक्षे च स्पर्शः कारणमन्वयव्यतिरेकात् । बहिरिंद्रियजन्यद्रव्यप्रत्यक्षमात्रे किं का
रणमिति चेन्न किंचित् ॥ आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु । रूपस्य कारणत्वे लाघवमिति चेत्तन्न । वायोस्त्वगिंद्रिये
णाग्रहणप्रसंगात् ॥ इष्टापत्तिरिति चेन्न उद्भूतस्पर्शस्यैव लाघवात् कारणमस्तु ॥ प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरिति चेत् किं न स्यात्तस्मात्प्र
भां पश्यामीति वद्वायुं स्पृशामीति प्रत्ययस्य सत्त्वाद्वायोरपि प्रत्यक्षत्वमेव ॥ बहिर्द्रव्यप्रत्यक्षमात्रे तु न रूपस्य न वा स्पर्शस्य हेतुत्वं ॥ वायुप्रत्यक्षे रे •रि॰ दि॰ ६
कत्वं गृह्यते एवं कुचिद् दलादिकमपि किंचित् संख्यापरिमाणाग्रहो दोषादित्याहुः । त्वचो योगो मनसा ज्ञानकारणमिति ॥ त्वङ्मनः संयोगो ज्ञा
नसामान्ये कारणमित्यर्थः । किं तत्र प्रमाणं ॥ सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमाने न मनसा ज्ञानाजननमिति ॥ ननु सुषुप्तिकाले किं ज्ञानं भ
विष्यति । अनुभवरूपं स्मरणरूपं वा । नाद्यः ॥ अनुभवसामग्र्यभावात् । तथा हि । प्रत्यक्षे चक्षुरादीनां सह मनः संयोगस्य हेतुत्वात् तदभावा
देव न चाक्षुषादिप्रत्यक्षं । ज्ञानादेरभावादेव न मानसप्रत्यक्षं ॥ ज्ञानाद्यभावे चात्मनोपि न प्रत्यक्षमिति । व्याप्तिज्ञानाभावादेव नानुमि
तिः । सादृश्यज्ञानाभावान्नोपमितिः । पदज्ञानाभावान्न शाब्दबोधः । इत्यनुभवसामग्र्यभावान्नानुभवः । उद्बोधकाभावान्न स्मरणं ॥

सि॰मु॰ मैवं। सुषुप्तिप्राक्काले त्वङ्मनोयोगादिव्यक्तेः स्वसंबंधेनात्मनश्च प्रत्यक्षत्वप्रसंगात्।। तदनींद्रियत्वे मानाभावात्। सुषुप्तिप्राक्काले निर्विकल्प-
मेव नियमेन जायत इत्यत्रापि प्रमाणाभावात्। अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षादिकाले
२४ त्वाचप्रत्यक्षं स्यात्। विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च सत्त्वात्।। परस्परप्रतिबंधादेकमपि वा न स्यादिति।। अत्र केचित्।। पूर्वोक्तसु-
षुप्त्यात्वङ्मनोयोगस्य हेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबंधकत्वमनुभवानुरोधात्कल्प्यत इति।। अन्ये तु सुषुप्त्यनुरोधा-
न्मनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यं। चाक्षुषादिप्रत्यक्षकाले त्वङ्मनस्संयोगाभावान्न त्वाचप्रत्यक्षमिति।। मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो
मतिः कृतिः ५८।। मनोजन्यप्रत्यक्षविषय इत्यर्थः।। मतिर्ज्ञानं कृतिर्यत्न एवं सुखत्वादिकमपि मनोग्राह्यं।। एवमात्मा मनोग्राह्यः।। किं-
तु मनोमात्रस्य गोचर इत्यनेन पूर्वमुक्तत्वादत्र नोक्तः।। निर्विकल्पाख्यमिति।। ज्ञानं यन्निर्विकल्पाख्यं तदतींद्रियमिष्यते।। चक्षुःसंयोगानन-
तरं घट इत्याकारकं घटत्वादिविशिष्टज्ञानं न संभवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात्।। विशिष्टबुद्धौ विशेषणस्य ज्ञानस्य कारण-
त्वात् तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाहि ज्ञानं जायते तदेव निर्विकल्पकं न प्रत्यक्षं। तथा हि।। वैशिष्ट्यानवगाहि ज्ञानस्य प्रत्य- २४
क्षं न भवति। घटमहं जानामीति प्रत्ययात्।। तत्रात्मनि ज्ञानं प्रकारीभूय भासते। ज्ञाने घटस्तत्र घटत्वं प्रकारो यः स एव विशेषणमित्यु-
च्यते। विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते विशेषणतावच्छेदकप्रकारं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणं।। निर्विकल्प

गुणकर्मसामान्यानां ३

केच घटत्वादिकं न प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं तेनेन संभवति। घटत्वाप्रकारकं च घटादिविशिष्टज्ञानं न संभ-
क वति। अत्यतिरिक्तपदार्थज्ञानस्य किंचिद्धर्मप्रकारत्वनियमात्।। महत्त्वं षड्विधे हेतुरिति।। द्रव्यप्रत्यक्षे महत्त्वं समवायसंबंधेन कारणमि-
ति। द्रव्यसमवेतानां प्रत्यक्षे स्वाश्रयसमवायसंबंधेन तत्समवेतप्रत्यक्षे स्वाश्रयसमवेतसमवायसंबंधेन कारणमिति।। इंद्रियमिति।। अ-
त्रापि षड्विध इत्यनुषज्यते। इंद्रियत्वं तु न जातिः। पृथिवीत्वादिना संकरप्रसंगात्।। किंतु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारण-
मनःसंयोगाश्रयत्वं। आत्मादिवारणाय सत्यंतं उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वात् शब्देतरेति। विशेषगुणस्य रूपादेश्चक्षुरादिसत्त्वादुद्भू-
तेति। उद्भूतत्वं न जातिः। शुक्लत्वादिना संकरात्। न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यं। उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानु-
पपत्तेः। किंतु शुक्लत्वादिव्याप्यमनुद्भूतत्वं नाना तदभावकूटश्चोद्भूतत्वं। लघुसंयोगादावपि। तथा च शब्देतरोद्भूतगुणः संयोगादिश्च-
क्षुरादौ अस्त्यतो विशेषेति।। कालादिवारणाय विशेष्यदलं। इंद्रियावयवविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनकत्वात्। इंद्रियावयव-
वारणाय कालादौ रूपाभावप्रत्यक्षे संनिकर्षघटतया कारणीभूतचक्षुःसंयोगाश्रयस्य कालादेर्वारणाय मनपदं। ज्ञानकारणमित्य-
पितद्वारणाय।। करणमिति।। इंद्रियं करणं मतं ५९ विषयेंद्रियसंबंधो व्यापारः सोपि षड्विधः।। असाधारणं कारणं करणं। असाधारणत्वं व्या-
पारवत्त्वं व्यापारः सन्निकर्षः। षड्विधसन्निकर्षमुदाहरणद्वारा दर्शयति।। द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ६० द्रव्येषु समवेतानां तथा तत्स

वयव ४

मवायतः तत्रापिसमवेतानांशब्दस्यसमवायतः ५१ तद्वृत्तीनांसमवेतसमवायेनतुग्रहः। विशेषणतयातद्वदभावानांग्रहोभवेत ५२ ।द्रव्यप्र
त्यक्षमिंद्रियसंयोगजन्यं।द्रव्यसमवेतप्रत्यक्षमिंद्रियसंयुक्तसमवायजन्यमेवमग्रेपि॥ वस्कुतस्तुद्रव्यचाक्षुषंप्रतिचक्षुःसंयोगःकारणं॥द्रव्य
२५ समवेतचाक्षुषंप्रतिचक्षुःसंयुक्तसमवायः॥द्रव्यसमवेतसमवेतचाक्षुषंप्रतिचक्षुःसंयुक्तसमवेतसमवायः॥एवमन्यत्रापिविशिष्टैवकार्यका
रणभावः॥परंतुपृथिवीपरमाणुनीलेनीलत्वंपृथिवीपरमाणौपृथिवीत्वंचचाक्षुषंकथंनग्रह्यते॥तत्रपरंपरयोद्भूतरूपसंबंधस्यमहत्वसंबंध
स्यचाविद्यमानत्वात॥तथाहि॥नीलत्वजातिरेकैवघटनीलेपरमाणुनीलेचवर्त्तते॥तथाचमहत्वसंबंधोघटेनीलत्वमादायवर्त्तते॥रूपसंबं
धस्तूभयमादायैववर्त्तते।एवंपृथिवीत्वेपिघटादिकमादायैमहत्वसंबंधोबोध्यः॥एवंवायौतद्रीयस्पर्शादौचक्षुषायाश्चाक्षुषप्रत्यक्षंस्यात
तस्मादुद्भूतरूपावच्छिन्नमहत्वावच्छिन्नचक्षुःसंयुक्तसमवायस्यद्रव्यसमवेतप्रत्यक्षेलाघवाच्चक्षुःसंयुक्तसमवेतसमवायस्यद्रव्यसमवेत
समवेतप्रत्यक्षेकारणत्वंवाच्यं॥इत्थंचपरमाणुनीलादौननीलत्वादिग्रहः॥परमाणुचक्षुःसंयोगस्यमहत्वावच्छिन्नसंयुक्तसमवेतत्वाभावात॥एवंवाय्वा
दौनसत्तादिचाक्षुषंतत्रचक्षुःसंयोगस्यरूपानवच्छिन्नत्वात॥एवंघटस्यपृष्ठावच्छेदेनालोकसंयोगःचक्षुःसंयोगस्त्वग्रावच्छेदेनतत्रघटप्र
त्यक्षाभावात्आलोकसंयोगावच्छिन्नत्वंचक्षुःसंयोगेविशेषणंबोध्यं॥एवंस्पार्शनप्रत्यक्षेत्वक्संयोगःकारणं।द्रव्यसमवेतस्पार्शनप्रत्यक्षे
त्वक्संयुक्तसमवायः॥द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षेत्वक्संयुक्तसमवेतसमवायः॥अत्रापिमहत्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं २५
चपूर्ववदेवबोध्यं॥एवंगंधप्रत्यक्षेघ्राणसंयुक्तसमवायः॥रसप्रत्यक्षेरसनासंयुक्तसमवायः॥गंधसमवेतस्यघ्राणजप्रत्यक्षेघ्राणसंयु

क्तस

क्तसमवेतसमवायः।रससमवेतस्यरासनप्रत्यक्षेरसनासंयुक्तसमवेतसमवायःकारणं॥शब्दप्रत्यक्षेश्रोत्रावच्छिन्नसमवायः॥शब्दसमवे
तश्रावणप्रत्यक्षेश्रोत्रावच्छिन्नसमवेतसमवायः॥अत्रसर्वत्रप्रत्यक्षंलौकिकंबोध्यं॥वक्ष्यमाणलौकिकंप्रत्यक्षमिंद्रियसंयोगादिकंविनापि
भवति॥एवमात्मप्रत्यक्षेमनःसंयोगआत्मसमवेतमानसप्रत्यक्षेमनःसंयुक्तसमवायः॥आत्मसमवेतसमवेतमानसप्रत्यक्षेमनःसंयुक्त
समवेतसमवायःकारणं॥अभावप्रत्यक्षेसमवायप्रत्यक्षेचेंद्रियसंबंधविशेषणताहेतुःवैशेषिकमतेतु॥समवायोनप्रत्यक्षः॥अत्रयद्यपि
विशेषणतानाना॥तथाहि॥भूतलादौघटाद्यभावःसंयुक्तविशेषणतयागृह्यते।संख्यादौरूपाद्यभावःसंयुक्तसमवेतविशेषणतयासंख्या
त्वादौरूपाद्यभावःसंयुक्तसमवेतसमवेतविशेषणतयाशब्दाभावः॥केवलश्रोत्रावच्छिन्नविशेषणतयाकादौखत्वाभावः॥श्रोत्रावच्छिन्नस
मवेतविशेषणतया॥एवंकत्वावच्छिन्नाभावेखत्वादिकंविशेषणविशेषणतया।एवंघटाभावादौपटाभावःसंयुक्तविशेषणविशेषण
तयाद्यूह्यमन्यदप्यूह्यं॥तथापिविशेषणत्वत्वेनैकेवगण्यते॥अन्यथाषोढासन्निकर्षइतिप्राचांप्रवादोव्याहन्येतेति॥यदिस्यादिति॥यदिस्यादु
पलभ्येतेत्येवंयत्रप्रसज्यते॥प्रत्यक्षंसमवायस्याविशेषणतयाभवेत॥५३॥अभावप्रत्यक्षेयोग्यानुपलब्धिःकारणं॥तथाहि॥भूतला
दौघटज्ञानेघटाभावादिकंनज्ञायते॥तेनाभावोपलंभेप्रतियोग्युपलंभाभावःकारणं॥तत्रयोग्यताप्यपेक्षिता॥साचप्रतियोगिसत्वप्र
संजनप्रसंजितप्रतियोगिकत्वरूपा॥तदर्थश्चप्रतियोगिनोघटादेःसत्वप्रसक्त्याप्रसंजितउपलंभरूपःप्रतियोगीयस्यसउपलंभाभा
वोअभावप्रत्यक्षेहेतुः॥तथाहि॥यत्रालोकसंयोगादिकंवर्त्ततेतत्रयघटःस्यात्तर्ह्युपलभ्यतेत्यापादयितुंशक्यतेतत्रघटाभावादिप्रत्य

तत्रेंद्रियसंबद्धक्वविशेष्यकं प्रकारीभूतं बोध्यं॥ तथाहि॥ यत्रेंद्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं॥

२८

सि॰मु॰। संभवति॥ अंधकारे तु नापादयितुं शक्यते॥ तेन चयाभावादंधकारे चाक्षुषप्रत्यक्षं न॥ स्पार्शनप्रत्यक्षं भवत्येव॥ आलोकसंसर्गं विना
२५ पि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात्॥ गुरुत्वादिकं यद्यपि योग्यं तदभावस्तु न योग्यः न प्रत्यक्षः॥ गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्य
त्वात्॥ वायावुद्भूतरूपाभावः पाषाणे सौरभाभावो गुडे तिक्ताभावो वह्नावनुष्णाभावः श्रोत्रे शब्दाभावः। आत्मनि सुखाभाव एवमादयस्तत्त
दिंद्रियैर्गृह्यते॥ तत्प्रत्यक्षस्यापादयितुं शक्यत्वात्संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता। अन्योन्याभावप्रत्यक्षे ऽधिकरणयोग्यत्व
मपेक्षितं॥ अतः स्तंभादौ पिशाचादिभेदोपि चाक्षुषग्राह्य एव॥ प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधं॥ तत्र लौकिकप्रत्यक्षे षो
ढा सन्निकर्षा उक्ताः॥ अलौकिकसन्निकर्षा निदानीं वदंति॥ अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः व्यापारः सन्निकर्षः॥ सामा
न्यलक्षणो ज्ञानलक्षणो योगजस्तथा ६४॥ आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते॥ तदिंद्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते॥६५॥
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः॥ योगिनो द्विविधाः प्रोक्ताः युक्तयुंजानभेदतः युक्तस्य सर्वदा भानं चिंतासहकृतोपरः॥६७॥॥
सामान्यं लक्षणं यस्येत्यर्थः॥ तत्र लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यप्रत्यासत्तिरित्यर्थो लभ्यते॥ तत्रेंद्रियसंबधविशिष्यव
स॰ क्तीनां च भानं कथं संभवति॥ तदर्थं सामान्यलक्षणा स्वीक्रियते॥ न च के वलं वह्नि धूमभानाभावे काक्षतिरिति। वाच्यं॥ प्रत्यक्षे धूमे
त॰ वह्निसंबंधस्य गृहीतत्वादन्यधूमस्य चानुपस्थितत्वा धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः। मन्मते तु सामान्यलक्षणया सकलधू २५
मोपस्थितौ कालांतरीयदेशांतरीयधूमे वह्निव्याप्यत्वसंदेहः संभवति॥ न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञा
क्षि

चाक्षुषज्ञाने २

ने जाते सार्वज्ञापत्तिरिति वाच्यं। प्रमेयत्वेन सकलज्ञाने जातेपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात्। एवं ज्ञानल
क्षणाया अस्वीकारे सुरभिचंदनमिति सौरभस्य भानं कथं स्यात् यद्यपि सामान्यलक्षणया सौरभस्य ज्ञानं संभवति॥ तथापि सौरभत्व
स्य भानं ज्ञानलक्षणया एवं धूमत्वेन धूलीपटलं यत्र धूलीपटलस्यानुव्यवसाये भानं ज्ञानलक्षणया॥ योगजो द्विविधः॥ योगाभ्यासज
नितो धर्मविशेषः श्रुतिपुराणादिप्रतिपाद्य इत्यर्थः॥ युक्तयुंजानाभ्यां तो योगजधर्मस्यापि द्वैविध्यं युक्तस्य तावद्योगजधर्मसहाये
न मनसा आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति २। द्वितीयस्य चिंताविशेषोपि सहकारीति॥ इति प्रत्य
क्षखंडं समाप्तं॥ ॥अनुमितिं व्युत्पादयति। व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत् ६७ अनुमायामिति॥ अनुमितौ व्याप्तिज्ञा
नं करणं॥ परामर्शो व्यापारः॥ तथाहि॥ येन पुरुषेण महानसादौ व्याप्तिर्गृहीता पश्चात्स एव पुरुषः क्वचित्पर्वतादौ अविच्छिन्नमूलां अभ्र
लिहां धूमरेखां पश्यति॥ तदनंतरं च धूमो वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं तस्य भवति पश्चाच्च वह्निव्याप्यधूमवानयं पर्वत इ
यं इति ज्ञानं भवति॥ स एव परामर्श इत्युच्यते॥ तदनंतरं पर्वतो वह्निमानिति ज्ञानं जायते तदेवानुमितिः। अत्र प्राचीना वदंति॥ व्याप्यत्वेन ज्ञा
कृ॰ ज्ञायमानं धूमादि लिंगमनुमितिकरणमिति॥ ज्ञायमानमिति॥ ज्ञायमानं लिंगं तु करणं नहीति॥ लिंगस्यानुमितिकरणत्वे दूषणमाह। त्य
अनागतादीति अनागतादिलिंगेन न स्यादनुमितिस्तदा॥ ६८॥ यद्यनुमितौ लिंगं करणं स्यात्तदाऽनागतेन विनष्टेन वा लिंगेनानु

तद्रूपवति २ धूमे वह्नि ५ च ५ युक्ति २

सि॰ मु॰ नुमितिर्न स्यादनुमितिकरणस्य लिंगस्य तदानीमभावात् ॥ व्याप्यस्येति ॥ व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते । व्याप्तिः
साध्यवदन्यावृत्तित्वं व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहि ज्ञानमनुमितौ जनकं ॥ तच्च व्याप्यः पक्ष इति ज्ञानं पक्षो व्याप्यवानिति ज्ञा
२७ नं वा ॥ अनुमितिस्तु पक्षो व्याप्य इति ज्ञानात्पक्षः साध्यवानित्याकारिका । पक्षो व्याप्यवानिति ज्ञानात्पक्षः साध्यवानिति ॥ द्विविधादपि परा कारिका ॥
मर्शात्पक्षः साध्यवानित्येवानुमितिरित्यन्ये ॥ ननु वह्निव्याप्यधूमवान्पर्वत इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो धूमो
द वह्निव्याप्य इति स्मरणं तत्र ज्ञानद्वयादनुमितिदर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं न सर्वत्र कारणं ॥ किंतु व्याप्यतावच्छेदकप्र
प्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वं ॥ आवश्यकत्वात् ॥ विशिष्टज्ञानकल्पने गौरवादिति चेन्न । व्याप्यतावच्छेदकाज्ञानेऽपि वह्निव्या
प्यवान्पर्वत इति ज्ञानादनुमित्युत्पत्तेः ॥ लाघवाच्च ॥ व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वं ॥ किंच धूमवान्पर्वत इति ज्ञानाद
स्य नुमित्यापत्तिः ॥ व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकपक्षधर्मताज्ञानस्य सत्त्वात् ॥ न च गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मता
ज्ञानस्य हेतुत्वं वाच्यं ॥ चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानादनुमितिः स्यात् ॥ यादृशपुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्र
कारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते ॥ तदानंतकार्यकारणभावः ॥ मन्मते तु न समवायेन व्याप्ति
प्रकारकपक्षधर्मताज्ञानं समवायेनानुमितिजननीयत्येवं न कार्यकारणभावः ॥ यादृशव्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं २८
च स्वतंत्रकारणमित्युच्यते ॥ तदा कार्यकारणभावद्वयं ॥ वह्निव्याप्यो धूमः आलोकवान्पर्वत इति ज्ञानादपि अनुमितिः स्यात् इति ॥

इत्थं च पत्रज्ञानद्वयं ततः त्रापि विशिष्टज्ञानं कल्पनीयं ॥ फलमुखगौरवस्यादोषत्वादिति ॥ व्याप्यो नाम व्याप्त्याश्रयः तत्र व्या=
प्तिः केत्यत आह ॥ व्याप्तिरित्यादि ॥ व्याप्तिः साध्यवदन्यस्मिन्नसंबंध उदाहृतः ६९ ॥ वह्निमान्धूमादित्यादौ साध्यं वह्निः ॥ साध्य
वान्महानसादिः तदन्यो जलह्रदादिः तद्वृ" ×साध्येति ॥ × त्तित्वं धूमस्येति लक्षणसमन्वयः ॥ धूमवान्वह्नेरित्यादौ साध्यवदन्यस्मि
न्नयःपिंडादौ वह्नेः सत्त्वान्नातिव्याप्तिः ॥ अत्र येनैव संबंधेन साध्यं तेनैव साध्यवान् बोध्यः ॥ अन्यथा समवायसंबंधेन वह्निमान्व
ह्नेरवयवस्तदन्यो महानसादिः तत्र धूमस्य विद्यमानत्वात् व्याप्तिप्रसंगात् ॥ साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिता व
कभेदवान्बोध्यः ॥ तेन यत्किंचिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमस्य सत्त्वेऽपि न क्षतिः ॥ येन संबंधेन हेतुता तेनैव साध्यवद
न्यावृत्तित्वं बोध्यं ॥ तेन वह्निमदन्यस्मिन्धूमावयवे धूमस्य समवायसंबंधेन सत्त्वेऽपि न क्षतिः ॥ साध्यवदन्यावृत्तित्वं च साध्यव
दन्यवृत्तित्वत्वावच्छिन्नाभावः ॥ तेन धूमवान्वह्नेरित्यत्र साध्यवदन्यह्रदादिवृत्तित्वाभावेऽपि नातिव्याप्तिः ॥ अत्र यद्यपि द्रव्यं गु
णकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः सत्तायाश्चैक्यात् ॥ साध्यवदन्यस्मिन्गुणादाववृत्तित्वं नास्ति ॥ तथापि हेतुता
वच्छेदकरूपेणावृत्तित्वं बोध्यं ॥ हेतुतावच्छेदकवृत्तितानवच्छेदकमिति फलितोऽर्थः ॥ ननु केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यव
दन्यस्याप्रसिद्धत्वादव्याप्तिः ॥ किंच सत्तावान्जातेरित्यादौ साध्यवदन्यस्मिन्सामान्यादौ हेतुतावच्छेदकसंबंधेन समवायेन वृत्तेर

चालिनीयन्यायेन सर्वेषां गौणोऽभावप्रतियोगित्वात्॰ ५

सि॰मु॰ प्रसिद्धत्वादव्याप्तिरत आह॰ अथवेति॰ अथवा हेतुमन्निष्ठविरहाप्रतियोगिना॰ साध्येन हेतोरेकाधिकरण्यं व्याप्तिरुच्यते
२८ हेतुमन्निष्ठा वृत्तिर्यस्य स तथा विरहोऽभावः तथा च हेत्वधिकरणवृत्तिर्योऽभावस्तदप्रतियोगिना साध्येन हेतोः समा
नाधिकरण्यं व्याप्तिः अत्र यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्वह्न्यादेर
स्तीत्यव्याप्तिः न च समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यं॰ तद्व्यक्त्योरुभयाभावसत्त्वात्॰ एकसत्त्वेऽपि द्व
यं नास्तीति प्रतीतेः गुणवान् द्रव्यत्वादित्यादौ अव्याप्तेश्च॰ तथापि साध्यतावच्छेदकं प्रतियोगितानवच्छेदकं तदवच्छिन्न
साध्यसामानाधिकरण्यं व्याप्तिरिति वाच्यं॰ ननु रूपत्वव्याप्यजातिमान् पृथिवीत्वादित्यत्र साध्यतावच्छेदका रूपत्वव्या
प्यजातयस्तासां च शुक्लत्वादिरूपाणां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न॰ तत्र पर
परसंबंधेन रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात्। न हि तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्यामस्ति॰ रूपत्व
व्याप्यजातिमान्नास्तीति बुध्यापत्तेः साध्यादिभेदेन व्याप्तिभेदात् तादृशत्वस्य साध्यतावच्छेदकतावच्छेदकं प्रतियोगिताव
च्छेदकतानवच्छेदकं इति वदंति॰ एवं यत्र साध्ये परंपरासंबंधेन उक्तावच्छेदकं मतो नाव्याप्तिः हेत्वधिकरणं हेतुतावच्छेदकविशि
ष्टाधिकरणं बोध्यं॰ तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादि ×दिकमेवा× त्यादौ ~~साध्ये परंपरासंबंधेन~~ न शुद्धसत्ताधि

विशेषलक्षणघटकं २ दण्डिमान् दण्डिसंयोगादित्यत्र २ साध्यता २ च२

वि

करणे गुणादिनिष्ठाभावप्रतियोगित्वेऽपि द्रव्यत्वेऽस्य नाव्याप्तिः हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं बोध्यं॰ तेन समवाये
न धूमाधिकरणतदवयवनिष्ठाभावप्रतियोगित्वेऽपि वह्नेर्नाव्याप्तिः अभावश्च प्रतियोगिव्यधिकरणो बोध्यः तेन कपिसं
योगी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन एतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेऽपि कपिसंयोगस्य नाव्याप्तिः न च
प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा तस्यैवाव्याप्तिः प्रतियोगिनः कपिसंयोगस्यानधिकर
णगुणादौ वर्तते योऽभावस्तस्यैव वृक्षे मूलावच्छेदेन सत्त्वात्॰ यदि प्रतियोग्यधिकरणावृत्तित्वं तदा संयोगी सत्त्वा
दित्यत्रातिव्याप्तिः सत्ताधिकरणे गुणादौ संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यं॰ हे
त्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात्॰ स्वप्रतियोग्यनधिकरणीभूतहेत्वधिके
रणवृत्त्यभाव इति निष्कर्षः प्रतियोग्यनधिकरणं च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं बोध्यं॰ तेन वि
शिष्टसत्तावान् जातेरित्यादौ सत्ताधिकरणगुणादौ विशिष्टसत्ताभावप्रतियोगिसत्ताधिकरणत्वेऽपि न क्षतिः
अत्र च साध्यतावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वं बोध्यं॰ तेन ज्ञानवान् सत्त्वादित्यादौ सत्त्वाधिकरण

मु॰ व॰ घयादेर्विषयतयाज्ञानाधिकरणत्वेपिनक्षतिः इत्थंचवह्निमान्धूमादित्यादौधूमाधिकरणेसमवायेनवह्निविरहसत्वे
पिनाव्याप्तिः ननुप्रतियोगितावच्छेदकावच्छिन्नस्ययस्यकस्यचिदनधिकरणत्वं तत्सामान्यस्यवा यत्किंचित्प्र
२९ तियोगितावच्छेदकंतदवच्छिन्नानधिकरणत्वंवाविवक्षितं आद्येकपिसंयोगीएतद्वृक्षत्वादित्यत्राव्याप्तिः कपिसं
योगाभावस्यगुणत्वप्रतियोगितावच्छेदकावच्छिन्नोगुणस्तादृशनिरूपिकपिसंयोगोभवतितदनधिकरणंचवृक्षइति द्वितीये
तुप्रतियोगिव्यधिकरणाभावाप्रसिद्धिः सर्वस्यैवाभावस्यपूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधि
करणत्वात् ननवह्निमान्धूमादित्यादौघटत्वाभावादेःपूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं
यद्यपिपर्वतादेस्तथापिसाध्यतावच्छेदकसंबंधेनतत्प्रतियोग्यनधिकरणत्वमस्त्येवेति[redacted]कपप्रतियोग्यधि वृत्ति
भावा करणाप्रसिद्धिरितिवाच्यं घटाभाववत्त्वतयोवह्न्यभाववत्त्वस्यघटाभावात्मकतयाघटाभावस्यवह्न्यादिप्रतियोगी
तदधिकरणंचपर्वतादीतिक्रमेणप्रतियोगिव्यधिकरणस्याप्रसिद्धत्वात् यद्यपिघटाभावादौवह्न्यभावादिर्भिन्नइ २९
त्युच्यते तथापिधूमाभाववान्वह्न्यभावादित्यादावव्याप्तिः तत्रसाध्यतावच्छेदकसंबंधःस्वरूपसंबंधस्तेनसंबंधे
पि॰

त्मकप्रतियोग्यधिकरणत्वा॰

नसर्वस्यैवाभावस्यपूर्वक्षणवृत्तित्वविशिष्टस्वाभावा ~~[illegible]~~ द्धेत्वधिकरणस्य तृतीयेतुकपिसंयो
गाभाववान् आत्मत्वादित्यादावव्याप्तिः तत्रात्मवृत्तिकपिसंयोगाभावाभावः कपिसंयोगस्तस्यप्रतियो
गि तावच्छेदकं गुणसामान्याभाववत्त्वमपितदवच्छिन्नानधिकरणत्वंहेत्वधिकरणस्यात्मनइतिचेत् याद्दशप्रति
योगितावच्छेदकावच्छिन्नानधिकरणत्वंहेतुमतस्ताद्दशप्रतियोगितानाश्रयत्वस्यविवक्षितत्वात् ननुका
लोघटवान्कालपरिमाणादित्यत्रप्रतियोगिव्यधिकरणाभावाप्रसिद्धिः हेत्वधिकरणस्यमहाकालस्य
जगदाधारतयासर्वेषामेवाभावानांसाध्यतावच्छेदकसंबंधेनकालिकविशेषणतयाप्रतियोग्यधिकरणत्वात्
अत्रकेचित् महाकालेमहाकालभेदविशिष्टघटाभाववत्त्वप्रतियोगिव्यधिकरणः महाकालस्यघटा
धारत्वेपिमहाकालभेदविशिष्टघटानाधारत्वात् महाकालेमहाकालभेदाभावात् वस्तुतस्तुप्रतियो
गितावच्छेदकसंबंधेनप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावप्रतियोगितासामान्येयत्संबं
धावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेनसंबंधेनतद्धर्मावच्छिन्नस्यतद्धेतुव्यापकत्वंबोध्यं व्या
पकसामानाधिकरण्यंचव्याप्तिः यत्संबंध[redacted]ःसाध्यतावच्छेदकसंबंधः यद्धर्मःसाध्यतावच्छेदकं

सि॰मु॰ तत्रयत्किंचिद्धर्मावच्छिन्नत्वाभावः उच्यते तदा समवायेन वह्न्यभावः तस्य प्रतियोगितावच्छेदकसंबंधः समवायः
तेन प्रतियोग्यनधिकरणपर्वतादिवृत्तिः स एव तत्प्रतियोगितावच्छेदकं च वह्नित्वमित्यव्याप्तिः स्यात् यत्सं
३० बंधावच्छिन्नत्वाभावमात्रमुच्यते तदा तादृशस्य संयोगेन घटाभावस्य प्रतियोगितायां संयोगसंबंधा ॥यत्किंच॥
धावच्छिन्नत्वसत्त्वादव्याप्तिः स्यादत उभयमुपात्तं साध्यतावच्छेदकसंबंधेन साध्याधिकरणे हेतुतावच्छेदक
संबंधेन हेतोर्वृत्तित्वं इत्थं च कालो घटवान् कालपरिमाणादित्यादौ संयोगसंबंधेन घटाभावप्रतियोगि
नो घटस्यानधिकरणे हेत्वधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावस्तस्य प्रतियोगि
तायां कालिकसंबंधावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभावसत्त्वान्नाव्याप्तिः ननु प्रमेयवह्नि
मान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धं गुरुधर्मस्यानवच्छेदकत्वादिति चेन्न कंबुग्री
वादिमान्नास्तीति प्रतीत्या कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताविषयीकरणेन गुरुधर्मस्याप्यवच्छे
दकत्वस्वीकारादिति संक्षेपः पक्षवृत्तित्वमित्यत्र पक्षत्वं किं तदाह सिषाधयिषया शून्या सिद्धिर्यत्र ३०
न तिष्ठति स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेदिति ७१ सिषाधयिषाविरहविशिष्टायाः सिद्धे

अतएवसाध्यसंदेहोनपक्षता ॥ विनापिसंदेहं तदनुमानात् २

यत्र सिषाधयिषास्ति तत्र सिद्धौ सत्यामसत्यां च पक्षता ३

रभावः पक्षता तद्वान् पक्षः इत्यर्थः सिषाधयिषामात्रं न पक्षता विनापि सिषाधयिषां घनगर्जितेन मेघानुमानात्
सिद्धौ सत्यामपि सिषाधयिषासत्त्वेऽनुमितिर्भवत्येवातः सिषाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणं
तथा च यत्र सिद्धिर्नास्ति तत्र सिषाधयिषायां सत्यामसत्यामपि पक्षता यत्र तु सिद्धिरस्ति सिषाध
यिषा च नास्ति तत्र न पक्षता सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वात् ननु यत्र परामर्शानंतरं सिद्धिस्ततः सि
षाधयिषा तत्र सिषाधयिषाकाले परामर्शनाशान्नानुमितिः यत्र सिद्धिपरामर्शौ सिषाधयिषा च क्रमेण भवं
ति तत्र सिषाधयिषाकाले सिषाधयिषैव नास्ति एवमन्यत्रापि सिद्धिकाले परामर्शकाले वा न सिषाधयिषा
योग्यविभुविशेषगुणानां यौगपद्यनिषेधात् कथं सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न पु
यवह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षं स्मरणं वा ततः सिषाधयिषा तत्र पक्षतासंपत्तये सिषाधयिषावि
रहस्य तद्विशेषणत्वस्यावश्यकत्वादिति अत्रेदं बोध्यं यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिंगका
नुमितिः तादृशतादृशसिषाधयिषाविरहविरहविशिष्टसिद्ध्यभावस्तल्लिंगकानुमितौ पक्षता तेनासिद्धिपरा
मर्शसत्त्वे यत्किंचिज्ज्ञानं जायतामितीच्छायामपि नानुमितिः वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्ष
सिद्धेर्नाशात्प्रतिबंधकाभावादेवानुमितिः यत्र सिषाधयिषासिद्धिपरामर्शास्तत्र परामर्शकाले ६

४ पक्षतावच्छेदकसामानाधिकरण्येनसाध्यसिद्धावपितदवच्छेदेनानुमितिदर्शनात्पक्षतावच्छेदकावच्छेदेनानुमितिंप्रति
पक्षतावच्छेदकावच्छेदेनसिद्धिरेवप्रतिबंधिका· ४

सि· मु· सत्वेप्रत्यक्षातिरिक्तंज्ञानंजायतामितीच्छायांतुभवत्येव· एवंधूमपरामर्शसत्वेआलोकेनवह्निमनु
३२ मिनोमीतीच्छायामपिनानुमितिः सिषाधयिषाविरहकालेयादृशसिद्धिसत्वेनानुमितिस्तादृशीसिद्धि
विशिष्यतत्तदनुमितौप्रतिबंधिकावक्तव्या· तेनपर्वतस्तेजस्वीपाषाणमयोवह्निमानितिज्ञानसत्वेप्यनु
मितेर्नविरोधः परंतुपक्षतावच्छेदकसामानाधिकरण्येनानुमितिंप्रतितुसिद्धिमात्रंविरोधि· इदंतुबो
ध्यं· अयंपुरुषोनवेतिसंशयानंतरंपुरुषत्वव्याप्यकरचरणादिमानितिज्ञानंतत्रसत्यामनुमित्सा
यां· पुरुषस्यप्रत्यक्षंभवतिनत्वनुमितिः अतोनुमित्साविरहविशिष्टसमानविषयकंप्रत्यक्षसामग्रीका
मिनीजिज्ञासादिवस्वातंत्र्येणप्रतिबंधिका· एवंपरामर्शानंतरंविनाप्रत्यक्षेच्छांपक्षादिप्रत्यक्षानुत्पत्तेः
प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्रीभिन्नविषयकप्रत्यक्षेप्रतिबंधिका· प्रसंगाद्धेत्वाभासा ३२
न्विभजते· अनैकांतोविरुद्धोप्यसिद्धः प्रतिपक्षितः कालात्ययापदिष्टश्चहेत्वाभासाश्चपंचधा ७२

अनैकांत इति तल्लक्षणंचयद्विषयत्वेनज्ञानस्यानुमितिविरोधित्वंतत्वं तथाहि· व्यभिचारादिविषय
कत्वेनज्ञानस्यानुमितिविरोधात्तेदोषाः यद्विषयकत्वंचयादृशविशिष्टविषयकत्वंबोध्यं· तेन
बाधभ्रमस्यानुमितिविरोधित्वेपितत्रपर्वतोवह्न्यभाववानितिविशिष्टस्याप्रसिद्धत्वान्नहेतुदोषः नच
वन्ह्यभावव्याप्यपाषाणमयत्ववानितिपरामर्शकालेवह्निव्याप्यधूमस्याभासत्वंनस्यात्तत्रवन्ह्यभावव्या
प्यवा[redacted]न्पक्षइतिविशिष्टस्याप्रसिद्धत्वादितिवाच्यं· इष्टापत्तेः अन्यथाबाधस्याप्य
नित्यदोषत्वापत्तेः तस्मात्तत्रवन्ह्यभाववपाषाणमयत्ववानितिपरामर्शकालेवह्निव्याप्यधूमस्यनाभास
त्वंभ्रमादनुमितिप्रतिबंधमात्रंहेतुस्तुनदुष्टः इत्थंचसाध्याभाववद्वृत्तिहेत्वादिकंदोषः तद्वत्ताचहेतोर्येन
केनापिसंबंधेनाभिनव्याः परंतुयद्विषयकत्वेनज्ञानस्यानुमितिविरोधित्वंतद्वत्त्वंहेत्वाभासत्वं· सत्प्रति
पक्षविरोधिव्याप्त्यादिकमेकमेवतथा· तद्वत्त्वंचहेतोर्ज्ञानरूपसंबंधेन· नचैववह्निमान्धूमादित्यादौपक्षेबा
धभ्रमेणसाध्याभावविषयकत्वेनानुमितिविरोधित्वात्ज्ञानरूपसंबंधेनतद्वत्वस्यापिसत्वात्सद्धेतो

सि.मु. रपिबाधितत्वापत्तिरिति वाच्यं· तत्रज्ञानस्यसंबंधित्वाकल्पनादत्रसत्प्रतिपक्षितइति व्यवहारेण त
३२ त्कल्पनात्तत्र बाधितव्यवहाराभावादित्याहुः अनुमितिविरोधित्वं चानुमितितत्करणज्ञानान्यतरवि
रोधित्वं· तेन व्यभिचारिणि नाव्याप्तिः दोषज्ञानं च तद्धेतुविषयकं चैतद्धेतुकानुमितौ प्रतिबंधकं· तेन केहे
तौ व्यभिचारज्ञाने हेत्वंतरेणानुमित्युत्पत्तौ तदभावाद्यनवगाहित्वाद्व्यभिचारस्यानुमितिविरोधित्वाभावे
पि न क्षतिरिति संक्षेपः यादृशसाध्यपक्षहेतौ यावंतो दोषास्तावदन्यान्यत्वं हेत्वाभासत्वं· पंचत्वकथनं तु
तत्संभवस्थलाभिप्रायेण· एवं साधारणाद्यन्यतमत्वं अनैकांतिकत्वं· आद्यः साधारणस्तु स्यादसाधार
णकोपरः तथैवानुपसंहारी त्रिधानैकांतिको भवेत् ७२ ॥ साधारणः साध्यवदन्यवृत्तिः तेन च व्या
प्तिज्ञानप्रतिबंधः क्रियते· असाधारणः साध्यासमानाधिकरणः यथा शब्दो नित्यः शब्दत्वादित्यादौ
तेन साध्यसामानाधिकरण्यग्रहप्रतिबंधः क्रियते· अन्ये तु सपक्षावृत्तिरसाधारणः सपक्षः निश्चि ३२

तसाध्यवान् इत्थं च शब्दो नित्यः शब्दत्वादित्यादौ पक्षे साध्यनिश्चयपक्षदशायामसाधारण्यं न हेतौ निश्चयादि
त्याहुः अनुपसंहारी चात्यंताभावाप्रतियोगिसाध्यकादिः अनेन च व्यतिरेकव्याप्तिज्ञानप्रतिबंधः क्रिय
ते विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी· अयं च साध्याभावग्रहसामग्रीत्वेन प्रतिबंधकः सत्प्र
तिपक्षे तु प्रतिहेतुः साध्याभावसाधकः अत्र हेतुरेक एवेति विशेषः साध्याभावसाधक एव साध्यसाधकत्वे
नोपन्यस्त इति अशक्तिविशेषोद्भावकत्वाच्च विशेषः सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः अगृही
ताप्रामाण्यकसाध्यव्याप्यवत्त्वेनोपस्थितिकालीनतदभावव्याप्यवत्त्वेनोपस्थितिविषय इत्यन्ये·
अत्र च परस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबंधः फलं अत्र केचित् यथा घटत्वाभाव
व्याप्यवत्ताज्ञाने पि घटचक्षुः संयोगे सति घटवत्ताज्ञानं जायते यथा च सत्यपि पीतत्वाभावव्या
प्यशंखत्ववत्ताज्ञाने पित्तादिदोषे पीतः शंख इति धीः एककोटिव्याप्यदर्शने द्विकोटिव्याप्यस्य प्रत्य
क्षरूपः संशयो भवति· तथा सत्प्रतिपक्षस्थले संशयरूपानुमितिर्भवति यत्र चैककोटिव्याप्यदर्श

सि·मु· नंतत्राधिकबलवत्तयाद्वितीयकोटिभानप्रतिबंधान्नसंशयः फलबलेनचाधिकसमबलभावः
कल्प्यतइत्याहुः तन्न तदभावव्याप्यवत्ताज्ञानेसतितदुपनीतभानविशेषशाब्दबोधादेरनुदयात्
३२ लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यज्ञानमात्रेतस्यप्रतिबंधकतालाघवात् नतूपनीतभानवि
शेषशाब्दबोधेचपृथक्प्रतिबंधकतागौरवात् तथाचप्रतिबंधकसत्वात्कथमनुमितिर्नहिलौकिकसन्निकर्ष
स्थलेप्रत्यक्षमिवसत्प्रतिपक्षस्थलेसंशयाकारानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेनापिविशेष
यं णीयं यत्रचकोटिद्वयव्याप्यवत्ताज्ञानंतत्रोभयत्राप्रामाण्यज्ञानान्नसंशयः नान्यथा अगृहीताप्रामा
ण्यकस्यैवविरोधिज्ञानस्यप्रतिबंधकत्वादिति आसिद्धिस्तु आश्रयासिध्याद्यन्यतमा आश्रयासि
द्धिःपक्षेपक्षतावच्छेदकस्याभावः यत्रकांचनमयःपर्वतोवह्निमानितिसाध्यते तत्रपर्वतोनकांचन
मयइतिज्ञानेविद्यमानेकांचनमयपर्वतपरामर्शप्रतिबंधःफलं स्वरूपासिद्धिस्तुपक्षेव्याप्यत्वेनाभि ३२
मतस्याभावः अत्रह्रदोद्रव्यंधूमादित्यादौपक्षेव्याप्यत्वाभिमतस्यहेतोरभावज्ञानेपक्षेव्याप्यहेतुम

त्ताज्ञानरूपस्यपरामर्शस्यप्रतिबंधःफलं साध्याप्रसिध्यादयस्तुव्याप्यत्वासिद्धिः साध्येसाध्यतावच्छे
दकाभावः साध्याप्रसिद्धिः एतज्ज्ञानेजातेकांचनमयवह्निमानित्यादौसाध्यतावच्छेदविशिष्टसाध्यप
रामर्शप्रतिबंधःफलं एवंहेतोर्हेतुतावच्छेदकाभावः साधनाप्रसिद्धिर्यथा कांचनमयधूमादौ अत्रचहे
तुतावच्छेदकविशिष्टहेतुज्ञानाभावात्तद्धेतुकव्याप्तिज्ञानादेरभावःफलं एवंवह्निमान्नीलधूमादित्यादौ
गुरुतयानीलधूमत्वस्यहेतुतानवच्छेदकत्वमपिव्याप्यत्वासिद्धिरित्यपिवदंति बाधस्तुपक्षेसाध्याभाव
साध्यवदन्यत्वादिः एतस्यचानुमितिप्रतिबंधःफलं तद्धर्मिकतदभावनिश्चयोलौकिकसन्निकर्षाजन्य
दोषविशेषाजन्यतद्धर्मिकतज्ज्ञानमात्रविरोधीति नचसंशयसाधारणंपक्षेसाध्यसंसृष्टत्वज्ञान
मनुमितिकरणंतद्विरोधितयाचबाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमितियुक्तं अप्रसिद्धिसाध्यकानु
मित्यनापत्तेः साध्यसंशयादिकंविनाप्यनुमित्युत्पत्तेः एवंसाध्याभावज्ञानप्रमात्वज्ञानमपिनतिबं
धकं प्रमाणाभावाद्गौरवाच्च अन्यथासत्प्रतिपक्षादावपितदभावव्याप्यज्ञानप्रत्वेनाविषयक

सि·मु· त्वेनप्रतिबंधकत्वापत्तेः किंतुभ्रमत्वज्ञानानास्कंदितबाधबुद्धेः प्रतिबंधकतातत्रभ्रमत्वशंकाविच्छेदने
प्रामाण्यज्ञानंक्वचिदुपयुज्यते· नचमंबाधस्थलेपक्षेहेतुसत्वेव्यभिचारः पक्षेहेत्वाभावेस्वरूपासिद्धिरेवदो
३४ षइतिवाच्यं बाधज्ञानस्यव्यभिचारादेर्भेदात्किंचपरामर्शानंतरंबाधबुद्धिस्तत्रव्यभिचारज्ञानादेर
किंचित्करत्वात् बाधस्यानुमितिप्रतिबंधकत्वंवाच्यं· नचपक्षेघटेगंधसत्वात्कथंबाधइतिवाच्यं·
पक्षतावच्छेदकदेशकालावच्छेदेनानुमितेरनुभवसिद्धत्वादितिवाच्यं· सत्प्रतिपक्षत्वव्याप्यभिन्नाये
हेत्वाभासास्तव्याप्योपितन्मध्यएवांतर्भवति· अन्यथाहेत्वाभासाधिक्यप्रसंगात्· बाधव्याप्यस
त्प्रतिपक्षोभिन्नएवस्वतंत्रेच्छेनमुनिनापृथगुपादानात् सत्प्रतिपक्षव्याप्यस्तुनप्रतिबंधकइतिप्रघ
ट्टकार्थः यःसपक्षेविपक्षेचभवेत्साधारणस्तुयः यस्तूभयस्माद्व्यावृत्तःसत्वसाधारणोमतः ७४ तथै
वानुपसंहारीकेवलान्वयिपक्षकः यःसाध्यवतिनैवास्तिसविरुद्धउदाहृतः ७५ सपक्षविपक्षवृ ३४
त्तिःसाधारणइत्यर्थः सपक्षःसाध्यवान् विपक्षःसाध्यवद्भिन्नः विरुद्धवारणायसपक्षवृत्तित्वमुक्तं वस्तु

तोविपक्षवृत्तित्वमेववाच्यं· विरुद्धस्यसाधारणत्वेपिदूषकताबीजस्यभिन्नतयातस्यपार्थक्यात्· यस्तूभ
यस्मादिति· सपक्षविपक्षव्यावृत्तइत्यर्थः सपक्षःसाध्यवत्तयानिश्चितः विपक्षःसाध्यशून्यतयानिश्चितः श
ब्दोनित्यःशब्दत्वादित्यादौयदाशब्देऽनित्यत्वस्यसंदेहस्तदासपक्षत्वंघटादीनामेवतद्व्यावृत्तंचशब्दत्वमिति
तदाऽसाधारण्यं· यदातुशब्देऽनित्यत्वनिश्चयस्तदानासाधारणः इदंचप्राचांमतेन· नवीनमतंतुपूर्वोक्तं
केवलान्वयिपक्षधर्मावच्छिन्नपक्षकइत्यर्थः सर्वमभिधेयंप्रमेयत्वादित्यादौसर्वस्यैवपक्षत्वात् सा
मानाधिकरण्यग्रहस्थलांतराभावान्नानुमितिः इदंतुनसम्यक् पक्षैकदेशेसहचारग्रहेपिपक्षेतरभावा
त् अस्तुवासहचारग्रहस्तथापिअज्ञानरूपासिद्धिरेवनहेत्वाभासत्वंतस्य· तथापिकेवला
न्वयिसाध्यकत्वंतत्वमित्युक्तं· यःसाध्यवतीति· एवकारेणसाध्यवत्तावच्छेदेनहेत्वभावोबोधि
तस्तथाचसाध्यव्यापकीभूताभावप्रतियोगित्वंतदित्यर्थः असिद्धंविभजते आश्रयासिद्धिराद्यास्या
त्स्वरूपासिद्धिरप्यथ· व्याप्यत्वासिद्धिरपरास्यादसिद्धिरतस्त्रिधा· ७६ पक्षासिद्धिर्यत्रपक्षोभवेन्म